अम्बा

श्री पञ्चस्तवी

अथ लघुस्तवः प्रथमः

नमस्त्रिपुरसुन्दर्यै

1. ऐन्द्रस्येव शरासनस्यदधती मध्ये ललाटं प्रभां
शौक्लीं कान्तमनुष्णगोरिव शिरस्यातन्वती सर्वतः।
एषाऽसौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहस्थिता
छिन्द्यान्नः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी॥

2. या मात्रा त्रपसीलतातनुलसत्तन्तूत्थिति स्पर्द्धिनी
वाग्बीजे प्रथमेस्थिता तव सदा तां मन्महे ते वयम् ।
शक्तिः कुण्डलिनिति विश्वजनन व्यापार बद्धोद्यमा
ज्ञात्वेत्थं न पुनः स्पृशन्ति जननी गर्भेऽर्भकत्वं नराः

3. दृष्ट्वा संभ्रमकारिवस्तु सहसा ऐ ऐ इति व्याहृतम्
येनाकूतवशादपीह वरदे !बिन्दुं विनापेक्षरम् ।
तस्यापि ध्रुवमेव देवि ! तरसा जाते तवानुग्रहे
वाचः सुक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्राम्बुजात्॥

4. यन्नित्ये ! तव कामराजमपरं मन्त्राक्षरं निष्कलम्
तत्सारस्वतमित्यवैति विरलः कश्चिदबुधश्चेद् भुवि ।
आख्यानं प्रतिपर्व सत्यतपसो यत्कीर्तयन्तो द्विजाः
प्रारम्भे प्रणवास्पद प्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥

5. यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैः
तार्तीयीकमहं नमामि मनसा त्वद्बीजमिन्दुप्रभम् ।
अस्त्वौर्वोऽपि सरस्वतीमऽनुगतो जाड्याम्बुविच्छित्तये
गौ शब्दो गिरि वर्तते सनियतं योगं विना सिद्धिदः ॥

6. एकैकं तव देवि ! बीजमनघं सव्यञ्जनाऽव्यञ्जनं
कूटस्थं यदि वा पृथक् क्रमगतं यद्वास्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं
जप्तं वा सफली करोति सहसा तं तं समस्तं नृणाम् ॥

7. वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदानपेशलकरां कर्पूर कुन्दोज्ज्वलाम् ।

उज्जृम्भाम्बुजपत्रकान्त नयनस्निग्ध प्रभालोकिनीं
ये त्वामम्ब न शीलयन्ति मनसा तेषां कवित्वं कुतः ॥

8. ये त्वां पाण्डुरपुण्डरीकपटलस्पष्टाभिराम प्रभां
सिञ्चन्तीममृतद्रवैरिव शिरो ध्यायन्ति मूर्ध्नि स्थिताम् ।
आश्रान्तं विकटस्फुटाक्षरपदा निर्यान्ति वक्त्राम्बुजा-
त्तेषां भारति ! भारती सुरसरित्कल्लोलोलोर्मिवत् ॥

9. ये सिन्दूरपरागपुञ्जपिहितां त्वत्तेजसा द्यामिमा-
मुर्वींचापि विलीनयावकरसप्रस्तारमग्नामिव ।
पश्यन्ति क्षणमप्यनन्यमनसस्तेषामनङ्गज्वर-
क्लान्तात्रस्तकुरङ्ग शावकदृशो वश्या भवन्ति स्फुटम् ॥

10. चञ्चत्काञ्चनकुण्डलाङ्गदधरामाऽऽबद्धकाञ्चीस्रजं
ये त्वां चेतसि तद्गते क्षणमपि ध्यायन्ति कृत्वास्थितिम् ।
तेषां वेश्मसु विभ्रमादऽहरहः स्फारी भवन्त्यश्चिरं
माद्यत्कुञ्जर कर्णताल तरलाः स्थैर्यं भजन्ते श्रियः

11. आर्भट्या शशिखण्ड मण्डितजटाजूटां, नृमुण्ड स्रज
बन्धूक प्रसवारुणाम्बरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामाऽऽपीनतुंगस्तनीं
मध्ये निम्नवलि त्रयांकिततनुं त्वद्रूपसंवित्तये ॥

12. जातोप्यल्प परिच्छिदे क्षितिभुजां सामान्यमात्रे कुले
निः शेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ।
यद्विद्याधरवृन्दवन्दितपदः श्रीवत्सराजोऽभवत्
देवि ! त्वच्चरणाम्बुजप्रणतिजः सोऽयं प्रसादोदयः ॥

13. चण्डि ! त्वच्चरणाम्बुजार्चनविधौ बिल्वीदलोल्लुण्ठन
त्रुट्यत्कण्टक कोटिभिः परिचयं येषा न जग्मुः कराः ।
ते दण्डाङ्कुश चक्र चाप कुलिश श्रीवत्समत्स्याङ्कितै
जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभि ॥

14. विप्रा क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैः
त्वां देवीं त्रिपुरे ! परापरमयीं सन्तर्प्य पूजाविधौ ।

यां यां प्रार्थयते मनः स्थिरधियां तेषां त एव ध्रुवं
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः

15. शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे
त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति स्फुटम् ।
लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
सा त्वं काचिदऽचिन्त्यरूपमहिमा शक्ति परा गीयसे ॥

16. देवानां त्रितयं, त्रयी हुतभुजां, शक्तित्रयं, त्रिस्वरा-
स्त्रैलोक्यं, त्रिपदी, त्रिपुष्करमथो, त्रिब्रह्म, वर्णास्त्रयः ।
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः

17. लक्ष्मी राजकुले जयां रणभुवि क्षेमङ्करीमध्वनि
क्रव्यादद्विपसर्पभाजि शवरीं कान्तारदुर्गे गिरौ ।
भूतप्रेतपिशाचजम्बुकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे ॥

18. माया, कुण्डलिनी, क्रिया, मधुमती, काली, कला मालिनी
मातङ्गी विजया, जया, भगवती, देवी, शिवा, शाम्भवी ।
शक्तिः, शंकरवल्लभा, त्रिनयना, वाग्वादिनी, भैरवी
ह्रींकारी, त्रिपुरा, परापरमयी, माता, कुमारीत्यसि ॥

19. आईं पल्लवितैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः
काद्यैः क्षान्तगतैः स्वरादिभिरथ क्षान्तैश्च च तैः सस्वरैः ।
नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगुह्यानि ते
तेभ्यो भैरवपत्नि विंशतिसस्रेभ्यः परेभ्यो नमः ॥

20. बोद्धव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं
भारत्यास्त्रिपुरेत्यनन्यमनसा यत्राद्यवृत्ते स्फुटम् ।
एकद्वित्रिपदक्रमेण कथितस्त्वत्पादसंख्याक्षरै-
र्मन्त्रोद्धारविधिर्विशेष सहिता सत्संप्रदायान्वितः ॥

21. सावद्यं निरवद्यमस्तु यदि वा किं वानया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति नरो यस्यास्ति भक्तिस्त्वयि ।
सन्चिन्त्यापि लघुत्वमात्मनि दृढं सञ्जायमानं हठात्
त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि स्फुटम् ॥

माँ अम्बा

अथ चर्चस्तवो द्वितीयः

नमस्त्रिपुरसुन्दर्यै

1. आनन्दसुन्दरपुरन्दरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्भुजं भवतु मे विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥

2. सौन्दर्यविभ्रमभुवो भुवनाधिपत्य-
सम्पत्तिकल्पतरवस्त्रिपुरे ! जयन्ति ।
एते कवित्वकुमुदप्रकरावबोध
पूर्णेन्दवस्त्वयि जगज्जननी प्रणामाः ॥

3. देवि स्तुतिव्यतिकरे कृतबुद्धयस्ते
वाचस्पतिप्रभृतयोऽपि जडीभवन्ति ।
तस्मान्निसर्गजडिमा कतमोऽहमत्र

स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥

4. मातस्तथापि भवतीं भवतीव्रताप-
विच्छित्तये स्तुतिमहार्णवकर्णधारः ।

स्तोतुं भवानि ! स भवच्चरणारविन्द-
भक्तिग्रहः किमपि मां मुखरीकरोति ॥

5. सूते जगन्ति भवती, भवती बिभर्ति
जागर्ति तत्क्षयकृते भवती, भवानी !
मोहं भिनत्ति भवती, भवती रुणद्धि
लीलायितं जयति चित्रमिदं भवत्या ॥

6. यस्मिन्मनागपि नवाम्बुजपत्रगौरि !
गौरि ! प्रसादमुधरां दृशमादधासि ।
तस्मिन्निरन्तरमनंगशरावकीर्ण-
सीमन्तिनीनयनसन्ततयः पतन्ति ॥

7. पृथ्वीभुजोऽप्युदयनप्रवरस्य तस्य
विद्याधरप्रणतिचुम्बितपादपीठः ।
यच्चक्रवर्तिपदवीप्रणयः स एष
त्वत्पादपङ्कजरजःकणजः प्रसादः ॥

8. कल्पद्रुमप्रसवकल्पितचित्रपूजा-
मुद्दीपितप्रियतमामदरक्तगीतिम् ।
नित्यं भवानि ! भवतीमुपवीणयन्ति
विद्याधराः कनकशैलगुहागृहेषु ॥

9. लक्ष्मीवशीकरणकर्मणि कामिनीना-
माऽकर्षणव्यतिकरेषु च सिद्धमन्त्रः ।
नीरन्ध्रमोहितिमिरच्छिदुरप्रदीपो
देवि ! त्वदङ्घ्रिजनितो जयति प्रसादः ॥

10. देवि ! त्वदङ्घ्रिनखरत्नभुवो मयूखाः
प्रत्यग्रमौक्तिकरुचो मुदमुद्वहन्ति ।
सेवानतिव्यतिकरे सुरसुन्दरीणां
सीमन्तीम्नि कुसुमस्तबायितं यैः ॥

11. मूर्ध्नि स्फुरत्तुहिनदीधितिदीप्तिदीप्तं
मध्ये ललाटममरायुधरश्मिचित्रम्

JAN '11

Wk	M	T	W	T	F	S	S
1/6	31					1	2
2	3	4	5	6	7	8	9
3	10	11	12	13	14	15	16
4	17	18	19	20	21	22	23
5	24	25	26	27	28	29	30

12 DAY 012-353

WEDNESDAY

हृच्चक्रचुम्बि हुतबुक् कणिकानुरूपं
ज्योतिर्यदेतदिदमम्ब । तव स्वरूपम् ॥

12. रूपं तव स्फुरितचन्द्रमरीचिगौर-
मालोकते शिरसि वागदिधैवतं यः ।
निःसीमसूक्तिरचनामृतनिर्भरस्य
तस्य प्रसाद मुधराः प्रसरन्ति वाचः ॥

13 सिन्दूरपांसुपटलच्छुरितामिव द्यां
त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् ।
यः पश्यति क्षणमपि त्रिपुरे ! विहाय
व्रीडां मृडानि । सुदृशस्तमनुद्रवन्ति ॥

14. मातर्मुहूर्तमपि यः स्मरति स्वरूपं
लाक्षारसप्रसरतन्तुनिभं भवत्याः ।
ध्यायन्त्यनन्यमनसस्तमनङ्गतप्ताः
प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्यः ॥

15. योऽयं चकास्ति गगनार्णवरत्नमिन्दु-
योऽयं सुरासुरगुरुः पुरुष पुराणः ।
यद्धाममर्धमिदमन्धकसूदनस्य
देवि ! त्वमेव तदिति प्रतिपादयन्ति ॥

16. इच्छानुरूपमनुरूपगुणप्रकर्षं
संकर्षिणि ! त्वमभिमृष्य यदा बिभर्ति ।
जायेत स त्रिभुवनैकगुरुस्तदानीं
देवः शिवोऽपि भुवनत्रयसूत्रधारः ॥

17. रुद्राणि ! विद्रुममयीं प्रतिमामिव त्वां
ये चिन्तयन्त्यरुणकान्तिमनन्यरूपाम् ।
तानेत्य पक्ष्मलदृशः प्रसभं भजन्ते
कण्ठावसक्तमृदुबाहुलतास्तरुण्यः ॥

18. त्वद्रूपमुल्लसितदाडिमपुष्परक्त-
मुद्भावयेन्मदनदैवतमक्षरं यः ।

तम् रूपहीनमपि मन्मथनिर्विशेष-
मालोकयन्त्युरुनितम्बभरास्तरुण्यः ॥

19. ध्यातासि हैमवति ! येन हिमांशुरश्मि-
मालाऽमलद्युतिरकल्मषमानसेन ।
तस्याऽविलम्बमनवद्यमनल्पकल्प-
मल्पैर्दिनैः सृजसि सुन्दरि ! वाग्विलासम् ॥

20. आधारमारुतनिरोधवशेन येषां
सिन्दूररंजितसरोजगुणानुकारि ।
दीप्तं हृदि स्फुरति देवि ! वपुस्त्वदीयं
ध्यायन्ति तानिह समीहितसिद्धसाध्या ॥

21. त्वामैन्दवीमिव कलामनुभालदेश-
मुद्भासिताम्बरतलामवलोकयन्तः ।
सद्यो भवानि ! सुधियः कवयो भवन्ति
त्वं भावनाहितधियां कुलकामधेनु ॥

22. त्वां व्यापिनीति समना इति कुण्डलीति
त्वां कामिनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति
देवि ! स्तुवन्ति विजयेति जयेत्युमेति ॥

23. ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति
रूपं तवाम्ब ! नवयावकपङ्कपिंगम् ।
तेषां सदैव कुसुमायुधबाणभिन्न-
वक्षःस्थला मृगदृशो वशगा भवन्ति ॥

24. उत्तप्तहेमरुचिरे ! त्रिपुरे ! पुनीही
चेतश्चिरन्तनमघौघवनं लुनीहि ।
कारागृहे निगडबन्धनपीडितस्य

त्वत्संस्मृतौ झटिति मे निगडास्त्रुटन्तु ॥

25. शर्वाणि ! सर्वजनवन्दित पादपद्मे
पद्मच्छदच्छविविडम्बितनेत्रलक्ष्मि ।

निष्पापमूर्ति जनमानसराजहंसि
हंसि त्वमापदमनेकविधां जनस्य ॥

26. त्वत्पादपंकजरजः प्रणिपातपूतैः
पुण्यैरनल्पमतिभिः कृतिभिः कवीन्द्रैः ।
क्षीरक्षपाकरदुकूलहिमावदाता
कैरप्यवापि भुवनत्रितयेऽपि कीर्तिः ॥

27 त्वद्रूपैकनिरूपणप्रणयिताबन्धो दृशोस्त्वद्गुण-
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि ।
त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्तनं वाचि मे
कुत्रापि त्वदुपासनव्यसनिता मे देवि । मा शाम्यतु ॥

28. उद्दामकाम परमार्थ सरोजषण्ड
चण्डद्युति द्युतिमुपासित षट्प्रकाराम ।
मोहद्विपेन्द्रकदनोद्यतबोधसिंह-
लीलागुहां भगवतीं त्रिपुरां नमामि ॥

29. गणेशवटुकस्तुता रतिसहायकामान्विता
स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता ।
अङ्ग:कुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः
कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥

30. ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्ररश्मि-
स्कन्दद्विपाननहुताशनवन्दितायै ।
वागीश्वरि ! त्रिभुवनेश्वरि ! विश्वमात-
रन्तर्बहिश्च कृतसंस्थितये नमस्ते ॥

31. यस्तोत्रमेतदनुवासरमीश्वराया
श्रेयस्करं पठति वा यदि वा शृणोति ।
तस्येप्सितं फलति राजभिरीड्यतेऽसौ
जायेत स प्रियतमो हरिणेक्षणानाम् ॥

जय अम्बे

अथ घटस्तवो तृतीयः
(नमस्त्रिपुरसुन्दर्यै)

1. देवि! त्र्यम्बकपत्नि! पार्वति! सति! त्रैलोक्यमातः! शिवे!
शर्वाणि! त्रिपुरे! मृडानि! वरदे! रुद्राणि! कात्यायनि!
भीमे! भैरवि! चण्डि! शर्वरि! कले! कालक्षये! शूलिनि!
त्वत्पादप्रणताननन्यमनसः पर्याकुलान्पाहि नः ॥

2. उन्मत्ता इव सग्रहा इव विषव्यासक्तमूर्च्छा इव
प्राप्तप्रौढमदा इवार्तिविरहग्रस्ता इवार्ता इव ।
ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एकाग्रत-
स्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति वामभ्रुव ॥

3. देवि! त्वां सकृदेव यः प्रणमति, क्षोणीभृतस्तंनम-
न्त्यजन्म स्फुरदङ्घ्रिपीठविलुठत्कोटीरकोटिच्छटा।
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥

4. ध्यायन्ति ये क्षणमपि त्रिपुरे! हृदि त्वां
लावण्ययौवनधनैरपि विप्रयुक्ताः ।

ते विस्फुरन्ति ललितायतलोचनानां
चितैकभित्तिलिखितप्रतिमाः पुमांसः ॥

5. एतं किं नु दृशा पिबाम्युत विशाम्यस्याङ्गमङ्गैर्निजैः
किं वामुं निगलाम्यनेन सहसा किं वैकतामाश्रये ।
तस्येत्थं विवशो विकल्पघटनाकूतेन योषिज्जनः
किं तद्यन्न करोति देवि ! हृदये यस्य त्वमावर्तसे ॥

6. विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः
शब्दः शक्तिरिति त्रिलोकजननि ! त्वय्येव तथ्यस्थितिः ।
इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं
त्वद्भक्तानपि, न क्षिणोषि च रुषा तद्देवि चित्रं महत् ॥

7. इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं
पाण्डूत्फुल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविम् ।
वर्षन्तीममृतं भवानि ! भवतीम् ध्यायन्ति ये देहिन-
स्ते निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान्दूरतः ॥

8. पूर्णेन्दो शकलैरिवातिबहलैः पीयूषपूरैरिव
क्षीराब्धेः लहरीभिरैरिव सुधापङ्कस्य पिण्डैरिव ।
प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया
चित्तान्तर्निहतार्तितापविपदस्ते सम्पदं बिभ्रति ॥

9. ये संस्मरन्ति तरलां सहसोल्लसन्तीम्
त्वां ग्रन्थिपञ्चकभिदं तरुणार्कशोणाम् ।
रागार्णवे बहलरागिणि मज्जयन्तीं
कृत्स्नं जगद् दधति चेतसि तान्मृगाक्ष्य ॥

10. लाक्षारसस्नपितपङ्कजतन्तुतन्वी -
मऽन्तः स्मरत्यनुदिनं भवतीं भवानि ।
यस्तं स्मरप्रतिममऽप्रतिमस्वरूपा
नेत्रोत्पलैर्मृगदृशो भृशमर्चयन्ति ॥

11. स्तुमस्त्वां वाचामव्यक्तां हिमकुन्देन्दुरोचिषम्
कदम्बमालां बिभ्राणमापादतललम्बिनीम् ॥

12. मूर्ध्नीन्दोः सितपङ्कजासनगतां प्रालेयपाण्डुत्विषं
वर्षन्तीमऽमृतं सरोरुहभुवो वक्त्रेऽपि रन्ध्रेऽपि च ।
अच्छिन्ना च मनोहरा च ललिता चाति प्रसन्नाऽपि च
त्वामेव स्मरतां स्मरारिदयिते ! वाक् सर्वतो वल्गति ॥

13. ददातीष्टान्भोगान्क्षपयति रिपून्हन्ति विपदो
दहत्याधीन व्याधीन शमयति सुखानि प्रतनुते ।
हठादन्तर्दुःखं दलयति पिन्ष्टीष्टविरहं
सकृद्ध्याता देवि किमिव निरवद्यं न कुरुते ॥

14. यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय-
त्यन्वेति प्रतिपद्यते कलयति स्तौत्याश्रयत्यर्चति ।
यश्च त्र्यम्बकवल्लभे ! तव गुणानाकर्णयत्यादरा-

तस्य श्रीर्निगृहादपैति विजयस्तस्यग्रतो धावति ॥

15. किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायां
का का कीर्तिः कुलकमलिनि ! ख्याप्यते न स्तुतायाम् ।

का का सिद्धिः सुरवरनुते! प्राप्यते नार्चितायां
कं कं योगं त्वयि न चिनुते चित्तमालम्बितायाम् ॥

16. ये देवि! दुर्धरकृतान्तमुखान्तरस्था
ये कालि! कालघनपाशनितान्तबद्धाः ।
ये चण्डि! चण्डगुरुकल्मषसिन्धुमग्ना-
स्तान्पासि मोचयसि तारयसि स्मृतैव ॥

17 लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि चिरं जयन्ति ।
यानि प्रणाममिलितानि नृणां ललाटे
लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥

18 रे मूढाः! किमयं वृथैव तपसा कायः परिक्लिश्यते
यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियन्ते गृहाः ।
भक्तिश्चेदविनाशिनी भगवतीपादद्वयी सेव्यता-
मुन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मी पुरो धावति ॥

19. याचे न कंचन न कंचन वञ्चयामि
सेवे न कंचन निरस्तसमस्तदैनयः ।
श्लक्ष्णं वसे मधुरमद्मि भजेवरस्त्री-
दैवी हृदि स्फुरति मे कुलकामधेनुः ॥

20. शब्दब्रह्ममयि स्वच्छे देवि त्रिपुरसुन्दरि ।
यथाशक्ति जपं पूजां ग्रहाण परमेश्वरि ॥

21. नन्दन्तु साधका सर्वे विनश्यन्तु विदूषका ।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुसदा ॥

22. दर्शनातपापशमनी जपान्मृत्युविनाशिनी ।
पूजिता दुःखदौर्भाग्यहरा त्रिपुरसुन्दरी ॥

23. नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥

24. मन्त्रहीनं क्रियाहीनं विधिहीनं च यद्गतम् ।
त्वया तत्क्षम्यतां देवि कृपया परमेश्वरि ॥

(जय त्रिपुरसुन्दरि)

Wk	M	T	W	T	F	S	S
1/6	31					1	2
2	3	4	5	6	7	8	9
3	10	11	12	13	14	15	16
4	17	18	19	20	21	22	23
5	24	25	26	27	28	29	30

अथ अम्बास्तवः चतुर्थः

ओं नमोऽम्बिकायै

1. यामामनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यविदो वदन्ति ।
तामर्धपल्लवितशङ्कररूपमुद्रां
देवीमनन्यशरणः शरणं प्रपद्ये ॥

2. अम्बस्तवेषु तव तावदकर्तृकाणि
कुण्ठी भवन्ति वचसामपि गुम्फनानि ।
डिम्बस्य मे स्तुतिरसावसमञ्जसापि
वात्सल्यनिघ्नहृदया भवती धिनोति ॥

3. व्योमेति बिन्दुरिति नाद इतीन्दुलेखा
रूपेति वाग्भवतनूरिति मातृकेति ।
निःष्यन्दमानसुखबोधसुधा स्वरूपा
विद्योतसे मनसि भाग्यवतां जनानाम् ॥

4. आविर्भवत्पुलकसन्ततिभिः शरीरै-
र्निष्यन्दमानसलिलैर्नयनैश्च नित्यम्

वाग्भिश्च गद्गदपदाभिरुपासते ये
पादौ तवाम्ब! भुवनेषु त एव धन्याः ॥

5. वक्त्रं यदुद्यतमभिष्टुतये भवत्या-
स्तुभ्यं नमो यदपि देवि शिरः करोति ।
चेतश्च यत्त्वयि परायणमम्ब तानि
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥

6. मूलालवालकुहरादुदिता भवानि!
निर्भिद्य षट सरसिजानि तडिल्लतेव ।
भूयोऽपि तत्र विशसि ध्रुवमण्डलेन्दु-
निष्यन्दमानपरमामृततोयरूपा ॥

7. दग्धं यदा मदनमेकमनेकधा ते
मुग्धः कटाक्षविधिरङ्कुरयांचकार ।
धत्ते तदा प्रभृति देवि! ललाटनेत्रं
सत्यं ह्रियेव मुकुलीकृतमिन्दुमौलिः ॥

FEB '11

Wk	M	T	W	T	F	S	S
6		1	2	3	4	5	6
7	7	8	9	10	11	12	13
8	14	15	16	17	18	19	20
9	21	22	23	24	25	26	27
10	28						

02 DAY 033-332
WEDNESDAY

8. अज्ञातसम्भवमनाकलितान्ववायं
भिक्षुं कपालिनमवाससमद्वितीयम् ।
पूर्वं करग्रहणमङ्गलतो भवत्याः
शम्भुं क एव बुबुधे गिरिराजकन्ये ॥

9. चर्माम्बरं च शवभस्मविलेपनं च
भिक्षाटनं च नटनं च परेतभूमौ ।
वेतालसंहतिपरिग्रहता च शम्भोः
शोभां बिभर्ति गिरिजे तव साहचर्यात् ॥

10. कल्पोपसंहरणकेलिषु पण्डितानि
चण्डानि खण्डपरशोरपि ताण्डवानि ।
आलोकनेन तव कोमलितानि मात-
र्लास्यात्मना परणमन्ति जगद्विभूत्यै ॥

11. जन्तोरपश्चिमतनोः सति कर्मसाम्ये
निःशेषपाशपटलच्छिदुरा निमेषात् ।

कल्याणि ! दैशिककटाक्षसमाश्रयेण
कारुण्यतो भवसि शाम्भववेधदीक्षा ॥

12. मुक्ताविभूषणवती नवविद्रुमाभा
यच्चेतसि स्फुरसि तारकितेव सन्ध्या ।
एका स एव भुवनत्रयसुन्दरीणां
कन्दर्पता व्रजति पञ्चशरीं विनापि ॥

13. ये भावयन्त्यमृतवाहिभिरंशुजालै
राप्यामानभुवनाममृतेश्वरीं त्वाम् ।
ते लङ्घयन्ति ननु मातरलङ्घनीयां
ब्रह्मादिभिः सुरवरैरपि कालकक्ष्याम् ॥

14. यः स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ।
पद्मासनां च हृदये भवतीमुपास्ते
मातः स विश्वकवितार्किकचक्रवर्ती ॥

04

DAY 035-330

FRIDAY

FEB '11

Wk	M	T	W	T	F	S	S
6		1	2	3	4	5	6
7	7	8	9	10	11	12	13
8	14	15	16	17	18	19	20
9	21	22	23	24	25	26	27
10	28						

15. बर्हावतंसयुतबर्बरकेशपाशां
गुञ्जावलीकृतघनस्तनहारशोभाम् ।
श्यामां प्रवालवदनां सुकुमारहस्तां
त्वामेव नौमि शवरीं शवरस्य जायाम् ॥

16 अर्धेन किं नवलताललितेन मुग्धे!
क्रीतं विभो परूषमर्धमिदं त्वयेति ।
आलीजनस्य परिहासवचांसि मन्ये
मन्दस्मितेन तव देवि! जडी भवन्ति ॥

17. ब्रह्माण्डबुद्बुदकदम्बकसंकुलोऽयं
मायोदधिर्विविधदुःखतरङ्गमालः ।
आश्चर्यमम्ब झटिति प्रलयं प्रयाति
त्वद्ध्यानसन्ततिमहावडवामुखाग्नौ ॥

18 दाक्षायणीति कुटिलेति गुहारणीति
कात्यायनीति कमलेति कलावतीति ।

एका सती भगवती परमार्थतोऽपि
सन्दृश्यते बहुविधा ननु नर्तकीव ॥

19 आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्या ॥

20 त्वं चन्द्रिका शशिनि, तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरुषे, पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा
निःसारमेव निखिलं त्वदृते यदि स्यात् ॥

21. ज्योतींषि यद्दिवि चरन्ति यदन्तरिक्षं
सूते पयांसि यदहिर्धरणीं च धत्ते ।
यद्वाति वायुरनलो यदुदर्चिरास्ते
तत्सर्वमम्ब ! तव केवलमाज्ञयैव ॥

22. सङ्कोचमिच्छसि यदा गिरिजे! तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनाः सुकरी भवन्ति ॥

23. भोगाय देवि! भवतीं कृतिनः प्रणम्य
भ्रूकिंकरीकृतसरोजगृहा सहस्राः ।
चिन्तामणि प्रचयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं रमन्ते ॥

24. हन्तुं त्वमेव भवसि त्वदधीनमीशे
संसारतापमखिलं दयया पशूनाम् ।
वैकर्तनीकिरणसंहतिरेव शक्ता
घर्मं निजं शमयितुं निजयैव वृष्ट्या ॥

25 शक्तिः शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमासनजालमिच्छा ।

ऐश्वर्यमायतनमावरणानि च त्वम्
किं तन्न यद्भवसि देवि! शशाङ्कमौलेः ॥

26. भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्याऽनले मरुति शान्तिरतीतशान्तिः ।
व्योम्नीति याः किल कला कलयन्ति विश्वं
तासां विदूरतरमम्ब! पदं त्वदीयम् ॥

27. यावदत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ।
तावद्विकल्प जटिलाः कुटिलप्रकारा-
स्तर्कग्रहाः समयिनां प्रलयं न यान्ति ॥

28. यद्देवयानपितृयानविहारमेके
कृत्वा मनः करणमण्डलसार्वभौमम् ।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥

29\. स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः
कस्याश्चनापि तव वैभवमम्ब यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सासि स्तुता किल मयेति तितिक्षितव्यम् ॥

30\. कालाग्निकोटिरुचिमम्ब ! षडध्वशुद्धा-
वाप्लावनेषु भवतीममृतौघवृष्टिम् ।
श्यामां घनस्तनतटां सकलीकृतौ च
ध्यायन्त एव जगतां गुरवो भवन्ति ॥

31\. विद्यां परां कतिचिदम्बरमम्ब केचि-
दानन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनाम
साक्षादपारकरुणां गुरुमूर्तिमेव ॥

32\. कुवलयदलनीलम् बर्बरस्निग्धकेशं, पृथुतरकुचभाराक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः, सकलभुवनमातः सन्ततं सन्निधत्ताम् ॥

अम्बिके नमः

अथ सकलजननीस्तवः पञ्चमः

नमः सकलजनन्यै

1. अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः ।
जगन्मातर्जन्मज्वरभयतमः कौमुदि ! वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥

2. वचस्तर्कागम्यस्वरसपरमानन्दविभव-
प्रबोधाकाराय द्युतिदलित नीलोत्पलरुचे ।
शिवस्याराध्याय स्तनभरविनम्राय सततं
नमो यस्मै कस्मैचन भवतु मुग्धाय महसे ॥

3. लुठद्गुञ्जाहारस्तनभरनमन्मध्यलतिका -
मुदञ्चद्धर्माम्भः कणगुणितनीलोत्पलरुचम् ।
शिवं पार्थत्राणप्रवणमृगयाकारगुणितं
शिवामन्वग्यान्तीं शबरमहमन्वेमि शबरीम् ॥

4. मिथः केशाकेशि प्रधननिधनास्तर्कघटना
बहुश्रद्धाभक्तिप्रणयविषयाश्चाप्तविधयः ।

प्रसीद प्रत्यक्षीभव गिरिसुते ! देही शरणं
निरालम्बं चेतः परिलुठति पारिप्लिवमिदम् ॥

5. शुनां वा वह्नेर्वा खगपरिषदो वा यदशनं
कदा केन क्वेति क्वचिदपि न कश्चित्कलयति ।
अमुष्मिन्विश्वासं विजहिहि ममाह्लाय वपुषि
प्रपद्येथाश्चेतः सकलजननीमेव शरणम् ॥

6 अनद्यन्ताभेदप्रणयरसिकापि प्रणयिनी
शिवस्यासीर्यत्त्वं परिणयविधौ देवि ! गृहिणी ।
सवित्री भूतानामपि यदुदभूः शैलतनया
तदेतत्संसारप्रणयनमहानाटकसुखम् ॥

7. ब्रुवन्त्येके तत्त्वं भगवति ! सदन्ये विदुरस-
त्परे मातः ! प्राहुस्तव सदसदन्ये सुकवयः ।
परे नैतत्सर्वं समभिदधते देवि ! सुधिय-
स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ! ॥

8. तडित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थिगहनं
प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा ।
किमप्यष्टात्रिंशत्किरणसकलीभूतमनिशं
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥

9. चतुष्पत्रान्तः षड्दलभगपुटान्तस्त्रिवलय-
स्फुरद्विद्युद्वह्निद्युमणिनियुताभद्युतियुते ।
षडश्रं भित्वादौ दशदलमथ द्वादशदलं
कलाश्रं च द्व्यश्रं गतवति नमस्ते गिरिसुते ॥

10. कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः
परे तत्सम्भेदं समभिदधते कौलमपरे ।
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे
महामाये! तत्त्वं तव कथममी निश्चिनुमहे ॥

11. षडध्वारण्यानीं प्रलयरविकोटिप्रतिरुचा
रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम् ।

वितन्वानः शैवं किमपि वपुरिन्दीवररुचिः
कुचाभ्यामानम्रः शिवपुरुषकारो विजयते ॥

12\. प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं
प्रविश्यैतद्द्वन्द्वं रविशशिसमाख्यं कवलयन् ।
प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः
प्रसादात्ते जन्तुः शिवमकुलमम्ब ! प्रविशति ॥

13\. प्रियङ्गुश्यामाङ्गीमरुणतरवासः किसलयां
समुन्मीलन्मुक्ताफलबहुलनेपथ्यकुसुमाम् ।
स्तनद्वन्द्वस्फारस्तवकनमितां कल्पलतिकाम्
सकृद्ध्यायन्तस्त्वा दधति शिवचिन्तामणिपदम् ॥

14\. षडाधारावर्तैरपरिमितमन्त्रोर्मिपटलै-
स्खलन्मुद्राफेनैर्बहुविधलसद्दैवतझषैः ।
क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदीं
भवानि ! प्रत्यग्रा शिवचिदमृताब्धिप्रणयिणी ॥

15. महीपाथोवह्नि श्वसनवियदात्मेन्दुरविभि-
र्वपुर्भिर्ग्रस्तांशैरपि तव कियानम्ब! महिमा ।
अमून्यालोक्यन्ते भगवति! न कुत्राप्यणुतरा-
मवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥

16. मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् ।
कटाक्षश्चेदत्र क्वचन तव मातः! करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥

17. कलां प्रज्ञामाद्यां समयमनुभूतिं समरसां
गुरुं पारम्पर्यं विनयमुपदेशं शिवकथाम् ।
प्रमाणं निर्वाणं परममतिभूतिं परगुहां
विधिं विद्यामाहुः सकलजननीमेव मुनयः ॥

18. प्रलीने शब्दौघे तदनु विरते बिन्दुविभवे
ततस्तत्त्वे ~~सोमि रसयति शिवाख्यां परतनुम्~~ ।
चाष्टध्वनि वपुरुपाधिन्युपरते

FEB '11

Wk	M	T	W	T	F	S	S
6		1	2	3	4	5	6
7	7	8	9	10	11	12	13
8	14	15	16	17	18	19	20
9	21	22	23	24	25	26	27
10	28						

श्रिते शाक्ते पर्वण्यनुकलित चिन्मात्र गहनां
स्वसंवित्तिं योगी रसयति शिवाख्यां परतनुम् ॥

19. परानन्दाकारां निरवधिशिवैश्वर्यवपुषं
निराकारज्ञान प्रकृतिमनवच्छिन्नकरुणाम् ।
सवित्रीं लोकानां निरतिशयधामास्पदपदां
भवो वा मोक्षो वा भवतु भवतीमेवभजताम्

20. जगत्काये कृत्वा तमपि हृदये तच्च पुरुषे
पुमांसं बिन्दुस्थं तमपि परनादाख्यगहने ।
तदेतज्ज्ञानाख्ये तदपि परमानन्दविभवे
महाव्योमाकारे ! त्वदनुभवशीलो विजयते ॥

21. विधे विद्ये वेद्ये विविधसमये वेदजननि !
विचित्रे विश्वाद्ये विनयसुलभे वेदगुलिके ।
शिवाज्ञे शीलस्थे शिवपदवदान्ये शिवनिधे
शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम् ॥

22. विधेर्मुण्डं हत्वा यदकुरुत पात्रं करतले
हरिं शूलप्रोतं यदऽगमयदंसाभरणताम् ।
अलंचक्रे कण्ठं यदपि गरलेनाम्ब! गिरिशः
शिवस्थायाः शक्तेस्तदिदमखिलं ते विलसितम् ॥

23. विरिञ्च्याख्या मातः! सृजसि हरिसंज्ञा त्वमवसि
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम् ।
~~भव~~ भवन्ती सादाख्या शिवयसि च पाशौघदलिनी
त्वमेवैकाऽनेका भवसि कृतिभेदैर्गिरिसुते! ॥

24. मुनीनां चेतोभिः प्रमृदितकषायैरपि मना-
गऽशक्ये संस्प्रष्टुं चकितचकितैरम्ब! सततम् ।
श्रुतीनां मूर्धानः प्रकृतिकठिनाः कोमलतरे
कथं ते विन्दन्ते पदकिसलये पार्वति! पदम् ॥

25. तडिद्वल्लीं नित्याममृत सरितं पाररहितां
मलोत्तीर्णां ज्योत्स्नाम प्रकृतिमगुणग्रन्थिगहनाम् ।

18 DAY 049-316

FRIDAY

FEB '11

Wk	M	T	W	T	F	S	S
6		1	2	3	4	5	6
7	7	8	9	10	11	12	13
8	14	15	16	17	18	19	20
9	21	22	23	24	25	26	27
10	28						

गिरां दूरां विद्यामऽविनतकुचां विश्वजननी-
मपर्यन्तां लक्ष्मीमभिदधति सन्तो भगवतीम्

26 शरीरं क्षित्यम्भः प्रभृतिरचितं केवलमिदं
सुखं दुःखं चायं कलयति पुमांश्चेतन इति ।
स्फुटं जानानोऽपि प्रभवति न देही रहयितुं
शरीरहंकारं तव समयबाह्यो गिरिसुते ॥

27. पिता माता भ्राता सुहृदऽनुचरः सद्म गृहिणी
वपुः पुत्रो मित्रं धनमपि यदा मां विजहति ।
तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्ने मातर्भव करुणया सन्निधिकरी ॥

28. सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः
सदोषं तं हित्वा तदनु गिरिराजस्य तनया ।
अनाद्यन्ता शम्भोरपृथगपि शक्तिर्भगवती
विवाहाज्जायासीत्यहह चरितं वेत्ति तव कः ॥

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

29. कणास्त्वद्दीप्तीनां रविशशिकृशानुप्रभृतयः
परं ब्रह्मं क्षुद्रं तव नियतमानन्दकणिका ।
शिवादिक्षित्यन्तं त्रिवलयतनोः सर्वमुदरे
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ॥

30. त्वया यो जानीते रचयति भवत्यैव सततं
त्वयैवेच्छत्यम्ब। त्वमसि निखिला यस्य तनवः ।
गतः साम्यं शम्भुर्वहति परमं व्योम भवती
तथाप्येवं हित्वा विहरति शिवस्येति किमिदम् ॥

31. पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं
परं स्थूलं सूक्ष्मं सकुलमकुलं गुह्यमगुह्यम् ।
दवीयो नेदीयः सदसदिति विश्वं भगवती
सदा पश्यन्त्याज्ञां वहसि भुवन्क्षोभ जननीम् ॥

32. मयूखाः पूष्णीव ज्वलन इव तद्दीप्तिकणिकाः
पयोधौ कल्लोलप्रतिहतमहिम्नीव पृषतः ।

उदेत्योदेत्याम्बा त्वयि सह निजैस्तात्त्विककुलै-
र्भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः ॥

33. विधुर्विष्णुर्ब्रह्माप्रकृतिरणुरात्मादिनकरः
स्वभावो जैनेन्द्रः सुगतमुनिराकाशमनिलः ।
शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां
विकल्पैरेभिस्त्वामऽभिदधति सन्तो भगवतीम् ॥

34. प्रविश्य स्वं मार्गं सहजदयया दैशिकदृशा
षडध्वध्वान्तौघच्छिदुरगणनातीतकरुणाम् ।
परानन्दाकारां सपदि शिवयन्तीमपि तनुं
स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥

35. शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ।
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं
प्रथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ॥

36. असंख्यैः प्राचीनैर्जननि जननैः कर्मविलया-
द्भूते जन्मन्यन्ते गुरुवपुषमासाद्य गिरिशम् ।
अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवा-
न्नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान्

37. यतषट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या-
योनिस्तस्याः प्रथितमुदरे यत्तदोंकारपीठम् ।
तस्मिन्नऽन्तः कुचभरनतां कुण्डलीतः प्रवृत्तां
श्यामाकारां सकलजननीं सन्ततं भावयामि ॥

38. भुवि पयसि कृशानौ मारुते खे शशाङ्के
सवितरि यजमानेऽप्यष्टधा शक्तिरेका ।
वहति कुचभराभ्यां या विनम्रापि विश्वं
सकलजननि! सा त्वं पाहि मामित्यवश्यम् ॥

जयश्रि जगदम्बा

इति शुभम्

श्री देवीध्यानरत्नमाला

ओं नमो भवान्यै

भक्तानुग्रहकारिणी भगवती देवाधिदेवेश्वरी
दीनानाथ कृपावती स्वजननी भक्तानुरक्ता सती ।
ॐकाराक्षरवासिनी सुरनुता सर्वेश्वरी सर्वदा
भूयान्नो वरदा सदा ह्यभयदा कामेश्वरी कामदा ॥

वराङ्कुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्ककोटिप्रतिभां त्रिनेत्रां भजेहमाद्यां भुवनेश्वरीं ताम् ॥

माता भवानी च पिता भवानी बन्धुर्भवानी च गुरुर्भवानी ।
विद्या भवानी द्रविणं भवानी यतो यतो यामि ततो भवानी ॥

श्रीशङ्खचक्रमुसलाम्बुजयुग्महस्तां
नागेन्द्रहारवलयाङ्कितकण्ठमालाम् ।
सिंदूरकुंकमसहस्रमरीचिदीप्तां
श्रीशारिकां त्रिनयनां हृदये स्मरामि ॥

बालार्ककोटिद्युतिमिन्दुचूडां वरासिचक्राभयबाह्यमाद्याम् ।
सिंहाधिरूढां शिववामदेहलीनां भजे चेतसि शारिकेशीम् ॥

या कुन्देन्दुतुषारहारधवला या श्वेतपद्मासना
या वीणावरदण्डमण्डितकरा या शुभ्रवस्त्रान्विता ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

या श्रीर्वेदमुखी तपः फलमुखी नित्यं च निद्रामुखी
नानारूपधरी सदा जयकरी विद्याधरी शंकरी ।
गौरी पीनपयोधरी रिपुहरी मालास्थिमालाधरी
सा मां पातुसरस्वती भगवती निःशेषजाड्यापहा ॥

या देवी शीवकेशवादिजननी यावैजगद्रूपिणी
या ब्रह्मादिपिपीलिकान्तजनतानन्दैकसंदायिनी ।
या पञ्चप्रणमन्निलिम्पनयनी या चित्कलामालिनी

FEB '11

Wk	M	T	W	T	F	S	S
6		1	2	3	4	5	6
7	7	8	9	10	11	12	13
8	14	15	16	17	18	19	20
9	21	22	23	24	25	26	27
10	28						

सापायत्परदेवता भगवती श्रीराजराजेश्वरी ॥

या माया मधुकैटभप्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डमथिनी या रक्तबीजाशनी ।
शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्धलक्ष्मीः परा
सा देवी नवकोटिमूर्त्तिसहिता मां पातु माहेश्वरी ॥

या खड्गं डमरुं त्रिशूलपरशू खट्वाङ्गपाशौ गदां
चक्रं मुद्गरचापबाणवरदभीतीः कपालाङ्कुशौ ।
धत्ते तोमरपुस्तके च मुसुलं दोर्भिर्दशात्ताष्टभि-
र्देवीभिः परिवारिता शशिधरा साशारिका पातु नः ॥

बीजे सप्तभिरुज्जवलाकृतिरसौ या सप्तसप्तिद्युतिः
सप्तर्षिप्रणताङ्घ्रिपङ्कजयुगा या सप्तलोकार्तिहृत् ।
काशमीरप्रवरेशमध्यनगरीप्रद्युम्नपीठे स्थिता
देवीसप्तकसंयुता भगवती श्रीशारिका पातु नः ॥

ब्रह्माणं च पुरन्दरं शिवहरी देवान्समस्तान्मुनीन्
या द्रष्टया दयया विलोकयति सा देव्यम्बिका पार्वती ।
चक्रस्था निजबोधभासितजगच्छान्तात्मिका सर्वगा
सान्द्रानन्दप्रदा परा भगवती पायात्सदाशारिका ॥

भक्तानां सिद्धिदात्री नलिन्युगकरा श्वेतपद्मासन्स्था
लक्ष्मी रूपा त्रिनेत्रा हिमकरवदना सर्वदैत्येन्द्र हर्त्री ।
वागीशी सिद्धिकर्त्री सकलमुनिजनैः सेविता या भवानी
नौम्यहं नौम्यहं त्वां हरिहरप्रणतां शारिकां नौमि नौमि ॥

आरक्ताभां त्रिनेत्रां मणिमुकुटवतीं रत्नताटङ्करम्यां
हस्ताम्भोजैः सपाशाङ्कुशमदनधनुःसायकैर्विस्फुन्तीम् ।
आपीनोत्तुङ्गवक्षोरुहतटविलुठत्तारहारोज्ज्वलाङ्गीं
ध्यायाम्यम्भोरुहस्थामरुणविवसनामीश्वरीमीश्वरानम् ॥

ज्वालापर्वतसंस्थितां त्रिनयनां पीठत्रयाधिष्ठितां
ज्वालाडम्बरभूषितां सुवदनां नित्यामद्रश्यां जनैः ।

Wk	M	T	W	T	F	S	S
6		1	2	3	4	5	6
7	7	8	9	10	11	12	13
8	14	15	16	17	18	19	20
9	21	22	23	24	25	26	27
10	28						

षट्चक्राम्बुजमध्यगां वरगदाम्भोजाभयान्बिभ्रती
8 चिद्रूपां सकलार्थदीपनकरीं ज्वालमुखीं नौम्यहम् ॥

9 संसारार्णवतारिणीं रविशशिकोटिप्रभां सुप्रभाम्
10 पापातङ्कनिवारिणीं हरिहरब्रह्मादिभिः संस्तुताम् ।
11 दारिध्र्यस्य विनशिनीं सुकृतिनां जाड्यं हरन्तीं भृशम्-
12 ज्ञानान्धमते कवित्वजननीं ज्वालामुखीं नौम्यहम् ॥

1 सैन्यानां महिषासरस्य मृतिदां सिहाधिरूढामुमाम्
2 नानाकारविशेषसौख्यजननी देहान्तरै संस्थिताम् ॥
3 बालामध्यमवृद्धरूपरमणीं श्रीसुन्दरीं वैष्णवीं
4 स्त्रीरूपेण जगद्विमोहनकरीं ज्वालमुखीं नौम्यहम् ॥

5 ज्वालामुखी महाज्वाले ज्वालापिंगललोचने
6 ज्वालातेजे महातेजे ज्वालामुखि नमोऽस्तुते ।
नमो भगवति ज्वाले काली त्रिपुरसुन्दरि
सर्वबीजपालयत्रि ज्वालामुखी नमोऽस्तुते ॥

आकाशे चण्डिका देवी पाताले भुवनेश्वरी ।
मर्त्यलोके जयादेवी पायात्त्रिपुरसुन्दरी ॥

श्री श्रीशैले स्थिता या प्रहसितवदना पार्वती शूलहस्ता
वह्निसूर्येन्दुनेत्रा त्रिभुवनजननी षड्भुजा सर्वशक्तिः ।
शाण्डिल्येनोपनीता जयति भगवती भक्तिगम्यानुयाता
सा नः सिंहासनस्था ह्यभिमतफलदा शारदा शं करोतु ॥

मूलाधाराद्द्रुतवहकलामिश्रितं भूर्भुवःस्व -
र्ब्रह्मस्थानात्परमगहनात्तत्सवितुर्वरण्यम् ।
भर्गोदेवः शशिकलमयी धीमहीतयेकरूपं
धियो योनः परमममृतं चोदयान्नः प्रपरं तत् ॥

प्रातःकाले कुमारी कुमुदकलिकया जप्यमालां जपन्ती
मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा विशाला ।
सन्ध्यायां वृद्धरूपा गलितकुचयुगे मुण्डमालां वहन्ती
सा देवी दिव्यदेहा हरिहरनमिता पातु नो ह्यादिमुद्रा ॥

चतुर्भुजामर्कसहस्रकोटिभां त्रिलोचनां हारकिरीटशोभिताम् ।
चतुर्मुखाङ्कोपगतां महोज्ज्वलां वेदेश्वरीं पञ्चमुखीं नमाम्यहं ॥

पद्मासनस्थां करपङ्कजाभ्यां रक्तोत्पले सन्दधतीं त्रिनेत्राम ।
सम्बिभ्रतीमाभरणानि रक्तां पद्मावतीं पद्ममुखीं नमामि ॥

पद्मेशपद्मोद्भवपद्मबन्धु मुखाः सुरा पादरजोपि यस्या ।
चिन्वन्त आप्ता न गताश्च पारं पद्मावती सा मम सद्मगास्तात ॥

देवीं शुद्धस्फटिकधवलां पञ्चवक्त्रां त्रिनेत्राम्
दोर्भिर्युक्तां दशभिरभितः शोभितां रत्नहारैः ।
काद्यं मुण्डं सृणिममसृणं शूलमच्छाच्छधारं
सारात्सारं वरमनवरं दक्षहस्तैर्वहन्तीम् ॥

उत्खट्वाङ्गं कठिनविकटं टङ्कमूर्जस्वदंकं
पाशं ज्ञानमृतरसमयं पुस्तक चाभयं च ।
कामं वामै शुभकरतलैर्बिभ्रतीं विश्ववन्द्यां
पद्मां प्रेतोपरिकृतपदां सिद्धलक्ष्मीं नमामि ॥

इच्छाशक्तिप्रथमलहरीमम्बरान्तः प्रवाह
गर्भीभूतां त्रिविधमुदितां पञ्चधा प्रस्फुरन्तीम् ।
सम्यग्देवीं स्फटिकधवलां शुद्धकुन्देन्दुवर्णां
रुद्रारूढां दशभुजयुतां क्षामगात्रीं नमामि ॥

उद्यद्भास्वत्समाभाविहितरविजयां मुण्डखण्डावनद्धां
ज्योतिर्मौलिं त्रिनेत्रां विविधमणिलसत्कुण्डलामण्डिताङ्गीम् ।
हारग्रैवेयकाञ्चीगुणमणिनिलयमेकचित्राम्बराढ्या-
मम्बां पाशाङ्कुशाढ्याभयवरदकरां सिद्धिदात्रीं नमामि ॥

सन्तः शंसन्त्यमुत्र त्रिजगति जगतीमण्डलं सारभूतं
तत्रापिक्ष्माधरं तं त्रिभुवनजननी जन्मने यं प्रपदे ।
तत्राप्याहुः शुभानां विघटितविपदां वेश्म काशमीरदेशं
त्वं तत्रानुग्रहार्थं प्रवहसि भविनामो नमस्ते वितस्ते ॥

गङ्गे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये
पुण्ये ब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ।

प्रायश्चित्तं परं नस्तव जलकणिका ब्रह्महत्याद्यघाना
कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गङ्गे प्रसीद ॥

दृष्टा जन्मशताधर्मं स्पृष्टा जन्मशतत्रयम् ।
स्नाता जन्मशतोत्थाघं हन्ति गङ्गा कलौ युगे ॥

हरतीयं महापापं गङ्गेश्वरसमुद्भवा ।
मातृपितृहिते गङ्गे हरिगङ्गे नमोऽस्तु ते ॥

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि नमोऽस्तु ते ॥

नमः कल्याणदे देवि नमः शङ्करवल्लभे ।
नमो भक्तिप्रदे देवि अन्नपूर्णे नमोऽस्तु ते ॥

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

उर्वी सर्वजनेश्वरी हिमवतः पुत्री कृपासागरी
नारी नीलसमानकुन्तलधरी नित्यान्नदानेश्वरी।
सर्वत्राणकरी सदा सुखकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बन करी मातान्नपूर्णेश्वरी॥

श्रीराज्ञी स्तोत्रम

या द्वादशार्कपरिमण्डितमूर्तिरेका
सिंहासनस्थितिमतीमुरगैर्वृतां च ।
देवीमनक्षगतिमीश्वरतां प्रपन्नां
तां नौमि भर्गवपुषीं परमार्थराज्ञीम् ॥

उद्यद्दिवाकरसहस्ररुचिं त्रिनेत्रां
सिंहासनोपरिगतामुरगोपवीताम्
खड्गाम्बुजाढ्यकलशामृतपात्रहस्तां
राज्ञीं भजामि विकसद्वदनारविन्दाम् ॥

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

यतपादपङ्कजतलेऽमरमूर्धमौलिन् -
यस्तेन्द्रनीलमणिसन्ततयः पतन्ति ।
किञ्जल्कपानरतमुग्धमधुव्रतत्वं
राज्ञी सदा भगवती जननीव नोऽव्यात् ॥

शीतांशुबालार्ककृशानुनेत्रां
चुतुर्भुजामेनत्वदासनस्थाम् ।
शङ्खाब्जशूलासिधरां महेशीं
राज्ञीं भजहं तुहिनाद्रिरूपाम् ॥

स्मृतैवान्तर्गतं पुंसां हरन्तीं सकलं मलम् ।
जयत्येषां महाराज्ञीं भक्तानां कामदायिनी ॥

त्रिजगन्मोहिनि ईड्ये मिहीरीभूतसदगुणे ।
नमोऽस्तुते माहाराज्ञी पाहि मां शरणागतम् ॥

शेषाशेषमुखागुणे गुणे गुणगणप्रिये ।
नमोऽस्तुते महाराज्ञि पाहि मां शरणागतम् ॥

सुरासुरनरसिद्धवन्दनीयपादाम्बुजे ।
8 नमोऽस्तुते महाराज्ञि पाहि मां शरणागतम् ॥
9 चराचरजगत्सृष्टिस्थितसंहारकारिणि ।
10 नमोऽस्तुते महाराज्ञि पाहि मां शरणागतम् ॥
11 भक्तकल्पलतेऽनलपवाङ्माधुर्यजितामृते ।
12 नमोऽस्तुते महाराज्ञि पाहि मां शरणागतम् ॥
1 ब्रह्माविष्णुमहेशानवन्दिते गिरिनन्दिनि ।
2 नमोऽस्तुते महाराज्ञि पाहि मां शरणागतम् ॥
3 भक्तानां भीमसंसारपारावारप्रतारिणि ।
4 नमोऽस्तुते महाराज्ञि पाहि मां शरणागतम् ॥
5 निर्गुणे निष्क्रिये नित्ये सच्चिदानन्दरूपिणि ।
6 नमोऽस्तुते महाराज्ञि पाहि मां शरणागतम् ॥
राज्ञिस्तोत्रमिदं पुण्यं त्रिसन्ध्यं प्रयतः पठेत् ।
असंशयमशेषेण वशयेदखिलं जगत् ॥

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

उद्यच्चन्द्रकलावतंसितशिखां क्लींकारवर्णोज्ज्वलाम्
श्यामां श्याममुखीं रवीन्दुनयनां क्लींवर्णरक्ताम्बराम् ।
भैंबीजाङ्कितमानसां शवगतां नीलाम्बरोद्भासिताम्
स्वाहालङ्कृतसर्वगात्रलतिकां. भैंभद्रकालीं भजे ॥

श्यामां श्याममुखीं विलोलवपुषं सत्कोटराक्षीं शिवां
विंशत्युत्तररूपिणीं मधुमदोन्मत्तां च रक्ताम्बराम ।
ब्रह्ममुण्डशिवादिविष्णुरशना हस्तामनङ्गोज्ज्वलां
प्रेतस्थां हृदयाम्बुजे भगवतीं भैंभद्रकालीं भजे ॥

गौराङ्गीं धृतपङ्कजां त्रिनयनां श्वेताम्बरां सिंहगां
चन्द्रोद्भासितशेखरां स्मितमुखीं धुर्यां वहन्तीं धुरम् ।
विष्णिवन्द्रप्रणताकृतिं च त्रिदशैं सम्पूजितांघ्रिद्वयीं
गौरीं मानसपङ्कजे भगवतीं भक्तेष्टदां तां भजे ॥

ऐन्दव्या कलयाऽवतंसितशिरोविस्तारिनादत्मकं –
तद्रूपं जननी स्मरामि परमं सन्मात्रमेकं तव ।

यत्रोदेति पराभिधा भगवती भासां च तासां पदं
पश्यन्तीमनु मध्यमां विहरति स्वैरं च सा वैखरी ॥

कस्मादम्ब विलम्बसे कुरु कृपां केनापि रूपेण मे
जिह्वाग्रे वस सन्निधेहि हृदये वाग्देवि तुभ्यं नमः ।
तन्निर्यान्तु ममास्यकुञ्जकुहराद्द्वारादिभूषातिरस-
कारिण्योरसपूरबन्धुरतया चेतो हरन्त्यो गिरः ॥

बालार्कायुतभास्वरां त्रिनयनां मन्दस्मितोद्यन्मुखीं
राजचन्द्रकलाधरां सुकवरीपुष्पालिवृन्दाकुलाम् ।
कस्तूरीतिलकां घनस्तनभरां पाशाङ्कुशावैक्षवं
कोदण्डं कुसुमेषुमेव दधतीं हस्ताम्बुजैस्तां भजे ॥

सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभाम्
शंखंचक्रवराभयानि दधतीमिन्दोः कलां बिभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैः स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम ॥

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

श्यामाङ्गीं शशिशेखरां निजकरैर्दानं च रक्तोत्पलं
रत्नाढ्यं चषकं परं भयहरं सम्बिभ्रतीं शाश्वतीम ।
मुक्ताहारलसत्पयोधरघटीं नेत्रत्रयोल्लासिनीं
वन्देहं हरिपूजितां हरवधूं रक्तारविन्दस्थिताम् ॥

वक्त्रैकेन विराजितां त्रिनयनां युग्मादिषटत्रिंशता
बाहूद्भासिमहायुधोद्यतकराम्भोजैश्चसिंहासनाम् ।
विश्वद्रुङ्महिषासुरस्य हृदयं शूलेन निर्भेदिनीं
दुर्गाख्यां प्रणमामि लोकजननीं त्वां रक्तगौरद्युतिम् ॥

मातर्मे मधुकैटभोग्रमहिषप्राणापहारोद्यते
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निःशेषीकृतरक्तबीजदलिनि नित्यं निसुम्भापहे
सुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेम्बिके ॥

आदिक्षान्तमर्निशं तु नदती या शब्दराशिस्तथा
पश्यंतीत्युत मध्यमा खुल परा तस्या परा वैखरी ।

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

सर्वप्राणिमयाऽखिलार्थजननी त्वेका चतुर्धास्थिता
8 मातः सा त्वमचिन्तयरूपमहिमा वागीश्वरीत्युच्यसे ॥

9 चापं पञ्चशरान्सृणिं विषधरं दोर्भिश्चतुर्भिः सदा
10 बिभ्रत्यदभूतरूपरक्तविभवैरेकानना सर्वदा ।
11 देयान्नोऽद्य सदाशिवस्थविलसद्रक्ताब्जसंस्था सदा
12 देवी श्रीत्रिपुरा पुरारिनिरता सम्यग्वरं भूतये ॥

1 बालामिन्दुकलावतंसितशिखां सूर्येन्दुवह्नीक्षणां
2 मालापुस्तकचापपाशयुगलं दोर्भिर्वहन्तीं सदा ।
3 उद्यत्सूर्यसहस्रदीप्तिसद्रशीं स्मेराननाम्भोरुहां
ध्यायहं त्रिपुरां परां भगवतीं त्रैलोक्यरक्षापराम ॥

माताःश्रित्रिपुरे परात्परतरे देवि त्रैलोकीमहा
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलाम् ।
उद्यदभानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम्

रक्ताब्धौ रत्नपोते रविदलकमलाभ्यन्तरे सन्निषण्णां
8 रक्ताङ्गी रत्नमौलिं स्फुरितशशिकलां स्मेरवक्त्रां त्रिनेत्राम् ।
9 बीजापूरेषुपाशांकुशमदनधनुः सत्कपालानि हस्तै-
10 र्बिभ्राणामानताङ्गीं स्तनभरभरणादऽम्बिकामाश्रयामः ॥

11 चापं पाशाङ्कुशसरसिजान्यङ्कुशं पुष्पबाणान्
12 तिभ्रणांतां करसरसिजैरत्नमौलिं त्रिनेत्राम् ।
1 हेमाब्जाभां कुचभरनतां रत्नमञ्जीरकाञ्ची-
2 ग्रैवेयाद्यैर्विलसिततनुं भावयेच्छक्तिमाद्याम् ॥

3 चन्द्रार्कानलकोटिनीरदरुचिं पाशाङ्कुशौचाशुगान् -
4 मुण्डं खड्गमभीतिमीश्वरवरं हस्ताम्बुजैरष्टभिः ।
5 कामेशानशिवोपरिस्थितपदां त्र्यक्षां वहन्ती परां
6 श्री चिन्तामणिमन्त्रराजवपुषध्यायेन्महाषोडशीम् ॥

त्र्यर्णा त्र्यश्रनिविष्टमर्तिरधिका मुद्रात्रयोदभासिता
या धत्तेऽङ्कुशपाशबाणनिचयं ~~जीयाज्जगन्मातृका~~ चापं चतुर्भिर्भुजैः ।

देवीभिस्ति सृभिस्तथाष्टभिरथो दिग्दिग्मनुख्यातिर्भि
वस्वष्टप्रमिताभिरष्टभिरथो जीयाज्जगन्मातृका ॥

या वहनीन्दुदिवाकराक्षिमुधरा या रक्तपदमासना
रत्नाकल्पविराजिताङ्घ्रिलतिका बालेन्दु चूडोज्ज्वला।
अक्षस्रृक्सृणिपाशपुस्तककरा या बालभानुप्रभा
तां वन्दे सुरसिद्धवन्दितपदामिष्टार्थसिदध्यै सदा॥

रक्ताम्बरां सिंहगतां स्मितास्यां पाशाङ्कुशौ नैकवटीं दधानाम।
विद्याम त्रिशूलं कमलं वहन्तीं ध्यायामि त्वां देवदेवीमपर्णाम ॥

अरूणकिरणजालैरञ्जिताशावकाश विधृतजपवटीका पुस्तकाभीतिहस्ता।
इतकरवराढ्यां फुल्लकल्हारसंस्था निवसतु हृदि बालादित्यकल्याणरूपा ॥

प्रसीद परदेवते ममहृदि प्रभूतं तमो विदारय दरिद्रतां दलय देहि सर्वज्ञतां।
विधेहि करुणनिधे चरणपदंयुग्मं स्वकं विदारितजरमृत्युं त्रिपुसुन्दरि श्रीशिवे

जय श्री भवानी नमः

MAR '11							
WK	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

ऐं ह्रीं अक्षमालिकायै नमः

ॐ नमो भवान्यै

श्रीदेवी ध्यानम्

सृष्टौ संस्थापनाय त्वऽपहरणविधौ मोहनेऽनुग्रहेपि

8 सर्वेषामर्गलानां निजमहिमवशादक्रमेणैव याऽलम् ।

9 नित्यं क्रीडप्रसक्ता रचयति सकलं स्वात्मशक्त्या प्रपञ्चं

10 सा नस्त्राणाय भूयादऽभिमतफलदा भद्रकाली च काली ॥

11 कालाम्बुवाहद्युतिमिन्दुवक्त्रां तारावलीशोभिपयोधराढ्याम् ।

12 कपालपाशांकुशशूलहस्तां नीलाम्बरां यामवतीं नमामि ॥

1 खड्गं चक्रगदेषुचापवरिधाञ्छूलं भुसुन्डी शिरः

2 शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।

3 यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

4 नीलाश्मद्युतिमास्य पाद दशकां सेवे महाकालिकाम् ॥

5 अक्षस्रक्परशुंगदेषुकुलिशं पद्मं धनुष्कुण्डिकाम्

6 दण्डं शक्तिमसिञ्च चर्म जलजं घण्टां सुराभाजनम् ।

शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां

सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सुरोजोदभवम्

APR '11

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

DAY 078-287
SATURDAY
19

उद्यदभानुसहस्रकान्तिमरूणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम् ।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीं बद्धहिमांशुरत्नमुकुटां वन्देऽरविन्दस्थिताम् ॥

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरूद्वहन्तीं त्रिनेत्राम ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितांसिद्धिकामैः ॥

घंटाशूलहलानि शंखमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं धनान्तविलसच्छीतांशुतुल्यप्रभाम् ।
गौरीदेहसमुदभवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥

DAY 079-286
SUNDAY
20

सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुःशरांश्च दधती ~~नेत्रैस्त्रिभि~~ शोभिताम्
नेत्रैस्त्रिभिः

MAR '11

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

आमुक्ताङ्गदहारकिर्मीरकङ्कणरणत्कांञ्चीरणन्नूपुरा
8 दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला ॥

9 ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलांगीं
10 न्यस्तैकाङ्घ्रिं सरोजे शशिकलधरां वल्लकीं वादयन्तीम् ।
11 कह्लाराबद्धमालां नियमितविलसच्चूलिकां रक्तवस्त्रां
12 मातङ्गीं शङ्खपात्रां मधुरमधुमदां चित्रकोदभासिभालां ॥

1 नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावली
2 भास्वद्देहलतां दिवाकरनिभां नेत्रत्रयोदभासिताम् ।
3 मालाकुम्भकपालनीरजकरा चन्द्रार्धचूडा परा
4 सर्वज्ञेश्वरभैरवाङ्कनिलयां पद्मावतीं चिन्तये ॥

5 बन्धूककाञ्चननिभां रुचिराक्षमालां
6 पाशाङ्कुशौ च वरदां निजबाहुदण्डैः ।
बिभ्राणमिन्दुसकलाभरणं त्रिनेत्राम्-
र्धाम्बिकेशमनिशं वपुराश्रयामि ॥

उत्तप्तहेमरुचिरां रविचन्द्रवह्नि-
नेत्रां धनुश्शरयुताङ्कुशपाशशूलम् ।
रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपां
कामेश्वरीं हृदि भजामि धृतेन्दुलेखाम् ॥

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्राम् भजे ॥

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनम् ।
पाशांकुशशरांश्चापं धारयन्तीं शिवां भजे ॥

पद्मासनस्थां करपङ्कजाभ्यां रक्तोतपले सन्दधतीं त्रिनेत्रां ।
सम्बिभ्रतीमाभरणानि रक्तां पद्मावतीं पद्ममुखीं नमामि ॥

श्रीदुर्गा अम्बा

श्रीराजराजेश्वरी स्तुतिः

ॐ नमो भवान्यै

ॐ छन्दः पादयुगा निरुक्तसुमुखा शिक्षा च जंघायुगा
ऋग्वेदोरूयुगा युजुःसुजघना या सामवेदोदरा ।
तर्कन्यायकुचा श्रुतिस्मृतियुक् काव्यादिवेदानना
वेदान्तामृतलोचना भगवती श्रीराजराजेश्वरी ॥

ईशाधीश्वरयोगिवृन्दविधृता स्वानन्दभूता परा
पश्यन्तीत्यनुमध्यमा विलसती श्रीवैखरीरूपिणी ।
आत्मानात्मविचारिणी त्रिनयना विद्यावती भारती
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥

कल्याणायुतपूर्णबिम्बवदना पूर्णेश्वरी नन्दिनी
पूर्णा पूर्णतरा परेशमहिषी पूर्णामृतास्वादिनी ।
सम्पूर्णा परमोत्तमामृतकला विद्यावती भारती
श्रीचक्र० ॥

एकाकारमनेकवर्णविविधाकारैकचिद्रूपिणी
चैतन्यात्मकएकचक्ररचिता चक्रांगएकाकिणी ।

भावाभावविभाविनी भयहर सद्भक्तचिन्तामणिः
श्रीचक्र० ॥

लक्ष्यालक्ष्यनिरीक्षणा निरूपमा रुद्राक्षमालाधरा
साक्षात्कारणदक्षवंशकलिता दीर्घातिदीर्घेश्वरी ।
भद्रा भद्रवरप्रदा भगवती भद्रेश्वरी भद्रदा
श्रीचक्र० ॥

ह्रींबाजानलनादबिन्दुभरता सत्कार नादात्मिका
ब्रह्मानन्दघनोदरी गुणवती ज्ञानेश्वरी ज्ञानदा ।
इच्छाज्ञानक्रियावती जितवती गन्धर्वसंसेविता
श्रीचक्र० ॥

हर्षोन्मत्तसुवर्णपात्रभरिता पार्श्वोन्नता घूर्णिता
हुंकारप्रियशब्दब्रह्म निरता स्वारस्वतोल्लासिनी ।
सारासारविचारचारुचरिता वर्णाश्रमाकारिणी
श्रीचक्र० ॥

MAR '11

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

25 DAY 084-281 FRIDAY

सर्वज्ञानकलावती सकरूणा सन्नादिनी नन्दिनी

8 सर्वान्तर्गतशालिनी शिवतनूसन्दीपिनी दीपिनी ।

9 संयोगप्रियरूपिणी प्रियवती प्रीता प्रतापोन्नता

10 श्रीचक्र० ॥

11 कर्माकर्मविवर्जिता कुलवती कर्मप्रदा कौलिनी

12 कारूण्यावधि सर्वकर्मनिरता सिन्धुप्रिया शालिनी ।

1 पूर्णब्रह्मसनातनान्तरगता ज्ञेया स्वयोगात्मिका

2 श्रीचक्र०

3 हस्तिकुम्भसदृकपयोधरवरा पीनोन्नता नम्रगा

4 हाराद्याभरणा सुरेन्द्रविनुता भृङ्गाटपीठालया ।

5 योन्याकारकयोनिमुद्रितकरा नित्यं सुवर्णात्मिका

6 श्रीचक्र० ॥

लक्ष्मीलक्षणपूर्णकुम्भवरदा लीलाविनोदस्थिता

लाक्षारञ्जितपदम्पादयुगला ब्रह्माण्डसंसेविता ।

लोकालोकितलोककामजयिनी लोकाक्षयाङ्काश्रया
श्रीचक्र ० ॥

ह्रींकाराङ्कितशङ्करप्रियतनुः श्रीयोगपीठेश्वरी
माङ्गल्यायुतपङ्कजाभनयना माङ्गल्यसिद्धिप्रदा ।
तारूण्यात्तपसार्चिता तरूणिका तन्त्रोपमातन्विता
श्रीचक्र ० ॥

सर्वेशाङ्गविहारिणी सकरुणा सर्वेश्वरी सर्वगा
सत्या सर्वमयी सहस्रदलग सप्तार्णवोपस्थिता ।
सङ्गासङ्गविवर्जिता सुखकरी बालार्ककोटिप्रभा
श्रीचक्र ० ॥

लक्ष्मीशादिविरिञ्चचक्रमुकुटा द्यष्टाङ्गपीठार्चिता

सूर्येन्दुरिनमयैकपीठनिलया चिन्मात्रकौलेश्वरी ।
गोप्त्री गुर्विणिगर्विता गगनगा गङ्गा गणेशप्रिया
श्रीचक्र ० ॥

MAR '11

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

कादिक्षान्तसुवर्णबिन्दुसुतनुः स्वर्णादि सिंहासना
नानारत्नविचित्ररचिता चातुर्यचिन्तामणिः ।
चित्तानन्दविधायिनी सुविपुला कोटित्रयीश्यम्बिका
श्रीचक्र० ॥

ह्रींकारत्रयरूपिणी समयिनी संसारिणी हंसिनी
वामाचारपरायणा सुमुकुटा बीजावती मुद्रिणी ।
कामाक्षी करुणाविचित्ररचिता श्रीश्री त्रिमूर्त्यात्मिका, श्रीचक्र० ॥

सा बिम्बप्रतिबिम्बलम्बित लसत् बिम्बाधरा याम्बिका
जम्बीरोत्पलकर्णशोभितमुखा जम्बूफल श्रीकुचा ।
नानारत्नकिरीटदीप्तलसिता प्रत्यक्षदीक्षात्मिका, श्रीचक्र० ॥

यत्तेजो निधिभिस्त्वनन्तघृणिभिर्णोपाद्यते प्रेरितुम् ।
हार्दं ध्वान्तमपास्य ~~सर्वमुदितं~~ सिक्षणपि तद्ध्यान मात्रा दृशा ॥
यत्सदभादनुभाति सर्वमुदितं भानुं यथा पद्मिनी ।
प्रत्यग्धाम नमाम तत्त्व वपुः श्रीराजराजेश्वरी ॥

श्री शारिके नमः

भवान्यष्टकम

न तातो न माता न बन्धुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥

भवाब्धावपारे महादुःखभीरुः
पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहं, गतिस्त्वं॰ ॥

न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रम ।
न जानामि पूजां न च न्यासयोगम्, गतिस्त्वं॰ ॥

न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित ।
न जानामि भक्तिं व्रतं वापि मातर्, गतिस्त्वं॰ ॥

कुकर्मी कुसङ्गी कुबुद्धि कुदासः

Wk	M	T	W	T	F	S	S
10		1	2	3	4	5	6
11	7	8	9	10	11	12	13
12	14	15	16	17	18	19	20
13	21	22	23	24	25	26	27
14	28	29	30	31			

30

DAY 089-276

WEDNESDAY

कुलाचारहीनः कदाचारलीनः ।
8 कुदृष्टिः कुवाक्य प्रबन्धः सदाहम् । गतिस्त्वं० ॥

9 प्रजेशं रमेशं महेशं सुरेशं
10 दिनेशं निशिथेश्वरं वा कदाचित् ।
11 न जानामि चान्यत् सदाहं शरण्ये । गतिस्त्वं० ॥

12 विवादे विषादे प्रमादे प्रवासे
1 जले चानले पर्वते शत्रुमध्ये ।
2 अरण्ये शरण्ये सदा मां प्रपाहि । गतिस्त्वं० ॥

3 अनाथो दरिद्रो जरारोगयुक्तो
4 महाक्षीनदीनः सदा जाड्यवक्त्रः ।
5 विपत्तौ प्रविष्टः प्रणष्टः सदाहं । गतिस्त्वं० ॥

6

श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम्

श्रीदुर्गास्तवराजः

नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे ।

नमस्ते जगद्वन्द्यपादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

नमस्ते जगच्चिन्त्यमानस्वरूपे नमस्ते महायोगिनि ज्ञानरूपे ।

नमस्ते सदानन्दनन्दस्वरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

अनाथस्य दीनस्य तृष्णातुरस्य क्षुधार्तस्य भीतस्य बद्धस्य जन्तोः ।

त्वमेका गतिर्देवि निस्तारकर्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

अरण्ये रणे दारुणे शत्रुमध्ये-ऽनले सागरे प्रान्तरे राजगेहे ।

त्वमेका गतिर्देवि निस्तारहेतु नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां देहभाजाम् ।

त्वमेका गतिर्देवि निस्तारनौका नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

नमश्चण्डिके चण्डदोर्दण्डलीला- समुत्खण्डिताखण्डलाशेषभीते ।
त्वमेका गतिर्विघ्नसन्दोहहन्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

त्वमेकाजिताराधिता सत्यवादि- न्यमेयाजिताक्रोधना क्रोधनिष्ठा ।
इडा पिङ्गला त्वं सुषुम्ना च नाडी नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

नमो देवि दुर्गे शिवे भीमनादे सरस्वत्यरुन्धत्यमोघस्वरूपे ।
विभूतिः शची कालरात्रिः सती त्वं नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

श्री दुर्गे

आनन्दलहरी

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

01

DAY 091-274

FRIDAY

भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः
प्रजानामीशानस्त्रिपुरमथनः पञ्चभिरपि ।
न षड्भिः सेनानीर्दशशतमुखैरप्यहिपति -
स्तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥१॥

घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदै -
विशिष्यानाख्येयो भवति रसनामात्रविषयः ।
तथा ते सौन्दर्यं परमशिवदृङ्मात्रविषयः
कथङ्कारं ब्रूमः सकलनिगमागोचरगुणे ॥२॥

मुखे ते ताम्बूलं नयनयुगले कज्जलकला
ललाटे काशमीरं विलसति गले मौक्तिकलता ।
स्फुरत्काञ्ची शाटी पृथुकटितटे हाटकमयी
भजामि त्वां गौरीं नगपतिकिशोरीमविरतम् ॥३॥

विराजन्मन्दारद्रुमकुसुमहारस्तनतटी
नदद्वीणानादश्रवणविलसत्कुण्डलगुणा ।

Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

DAY 092-273
SATURDAY 02

नताङ्गी मातङ्गीरूचिरगतिभङ्गी भगवती
सती शम्भोरम्भोरुहचटुलचक्षुर्विजयते ॥४॥

नवीनार्कभ्राजन्मणिकनकभूषापरिकरै-
र्वृताङ्गी सारङ्गीरुचिरनयनाङ्गीकृतशिवा ।
तडित्पीता पीताम्बरललितमञ्जीरसुभगा
निरवधिसुखैस्तु सुमुखी ॥
ममापर्णा पूर्णा ~~सुललितकरैः पल्लवयुता~~ ॥५॥

हिमाद्रेः संभूता सुललितकरैः पल्लवयुता
सुपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः ।
कुतस्थाणुस्थाना कुचफलनता सुक्तिसरसा
रूजां हन्त्री गन्त्री विलसति चिदानन्दलतिका ॥६॥

सपर्णामाकीर्णां कतिपयगुणैः सादरमिह

DAY 093-272
SUNDAY 03

श्रयन्त्यन्ये वल्लीं मम तु मतिरेवं विलसति ।
अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः
पुराणोऽपि स्थाणुः फलति ~~सकलामायजनको~~ किल कैवल्यपदवीम् ॥७॥

ℓ

विधात्री धर्माणां त्वमसि सकलाम्नायजननी
त्वमर्थानां मूलं धनदनमनीयाङ्घ्रिकमले ।
त्वमादिः कामानां जननि कृतकन्दर्पविजये
सतां मुक्तेर्बीजं त्वमसि परमब्रह्ममहिषी ॥८॥

प्रभूतां भक्तिस्ते यदपि न ममालोलमनस-
स्त्वया तु श्रीमत्या सदयमवलोक्योऽहमधुना ।
पयोदः पानीयं दिशति मधुरं चातकमुखे
भृशं शङ्के कैर्वा विधिभिरनुनीता मम मतिः ॥ ९ ॥

कृपापाङ्गालोकं वितर तरसा साधुचरिते
न ते युक्तोपेक्षा मयि शरणदीक्षामुपगते ।
न चेदिष्टं दद्यादनुपदमहो कल्पलतिका
विशेषः सामान्यैः कथमितरवल्लीपरिकरैः ॥१०॥

महान्तं विश्वासं तव चरणपङ्केरुहयुगे
निधायान्यन्नैवाश्रितमिह मया दैवतमुमे ।

तथापि त्वच्चेतो यदि मयि न जायेत सदयं
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥२१॥

~~अय~~ अयः स्पर्शे लग्नं सपदि लभते हेमपदवीं
यथा रथ्यापाथः शुचि भवति गङ्गौघमिलितम् ।
तथा तत्तत्पापैरतिमलिनमन्तर्मम यदि
त्वयि प्रेम्णासक्तं कथमिव न जायेत विमलम् ॥२२॥

त्वदन्यस्मादिच्छाविषयफललाभे न नियम-
स्त्वमर्थानामिच्छाधिकमपि समर्था वितरणे ।
इति प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मन-
स्त्वदासक्तं नक्तं दिवमुचितमीशानि कुरु तत् ॥२३॥

स्फुरन्नानारत्नस्फटिकमयभित्तिप्रतिफल-
त्वदाकारं चञ्चच्छशधरकलासौधशिखरम् ।
मुकुन्दब्रह्मेन्द्रप्रभृतिपरिवारं विजयते
तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥२४॥

~~तवागा~~

APR '11

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

06 DAY 096-269 WEDNESDAY

निवासः कैलासे विधिशतमखाद्याः स्तुतिकराः
8 कुटुम्बं त्रैलोक्यं कृतकरपुटः सिद्धिनिकरः ।
9 महेशः प्राणेशस्तदवनिधराधीशतनये
10 न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥१५॥

11 वृषो वृद्धो यानं विषमशनमाशा निवसनं
12 श्मशानं क्रीडाभूर्भुजगनिवहो भूषणविधिः ।
1 समग्रा सामग्री जगति विदितैवं स्मररिपो-
2 र्यदेतस्यैश्वर्यं तव जननि सौभाग्यमहिमा ॥१६॥

3 अशेषब्रह्माण्डप्रलयविधिनैसर्गिकमतिः
4 श्मशानेष्वासीनः कृतभसितलेपः पशुपतिः ।
5 दधौ कण्ठे हालाहलमखिलभूगोलकृपया
6 भवत्याः संगत्या फलमिति च कल्याणि कलये ॥१७॥

त्वदीयं सौन्दर्यं निरतिशयमालोक्य परया
भियैवासीद्गङ्गा जलमयतनू शैलतनये ।

MAY '11

Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

तदेतस्यास्तस्माद्वदनकमलं वीक्ष्य कृपया
प्रतिष्ठामातन्वन्निजशिरसिवासेन गिरिशः ॥१८॥

विशालश्रीखण्डद्रवमृगमदाकीर्णघुसृण-
प्रसूनव्यामिश्रं भगवति तवाभ्यङ्गसलिलम् ।
समादाय स्रष्टा चलितपदपांसून्निजकरैः
समाधत्ते सृष्टिं विबुधपुरपङ्केरुहदृशाम ॥१९॥

वसन्ते सानन्दे कुसुमितलताभिः परिवृते
स्फुरन्नानापद्मे सरसि कलहंसालिसुभगे ।
सखीभिः खेलन्तीं मलयपवनान्दोलितजले
स्मरेद्यस्त्वां तस्य ज्वरजनितपीडापसरति ॥२०॥



अन्नपूर्णा स्तोत्रम्

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

08

DAY 098-267

FRIDAY

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिल-घोरपापनिकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचल-वंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥१॥

नानारत्नविचित्र-भूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमान-विलसद्-वक्षोज-कुम्भान्तरी ।
काशमीरागरुवासिता रुचिकरी काशीपुराधीश्वरी
भिक्षां देहि ॰ ॥२॥

योगानन्दकरी रिपुक्षयकरी धर्मैकनिष्ठाकरी
चन्द्रार्कानल-भासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यकरी तपः फलकरी काशीपुराधीश्वरी
भिक्षां देहि ॰ ॥३॥

कैलासाचलकन्दरालयकरी गौरी ह्युमा शांकरी
कौमारी निगमार्थगोचरकरी ह्योंकारबीजाक्षरी ।

मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि० ॥४॥

दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रखेलनकरी विज्ञानदीपांकुरी ।
श्रीविश्वेशमनः प्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि० ॥५॥

उर्वीसर्वजनेश्वरी जयकरी माता कृपासागरी
वेणीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी ।
साक्षान्मोक्षकरी सदा शुभकरी विश्वेश्वरी श्रीधरी
भिक्षा देहि० ॥६॥

आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी

काश्मीरी त्रिपुरेश्वरी त्रिनयनी विश्वेश्वरी शर्वरी ।
स्वर्गद्वारकपाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि० ॥७॥

देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी
वामा स्वादुपयोधरी प्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि० ॥८॥

चन्द्रार्कानलकोटिकोटिसदृशी चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसांकुशधरी काशीपुराधीश्वरी
भिक्षां देहि० ॥९॥

क्षत्रत्राणकरी महाभयकरी माता कृपासागरी
सर्वानन्दकरी सदा शिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि० ॥१०॥

अन्नपूर्णे सदापूर्णे शंकरप्राणवल्लभे, ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि
च पार्वति ॥

माता मे पार्वती देवी पिता देवो महेश्वरः, बान्धवा शिवभक्ताश्च
स्वदेशो भुवनत्रयम् ॥

अम्बा

अन्नपूर्णा स्तुति

मन्दार कल्प हरिचन्दन पारिजात
मध्ये शशांङ्क मणिमण्डित वेदिसंस्थे ।
अर्धेन्दुमौलि सुललाट षडर्धनेत्रे
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

केयूर हार कटकाङ्गद कर्णपूरे
काञ्ची कपाल मणिकान्ति लसद्दुकूले ।
दुग्धान्न पात्र वर काञ्चन दर्विहस्ते
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

आली कदम्ब परिसेवित पार्श्वभागे
शक्रादिभिर्मुकुलिताञ्जलिभिः पुरस्तात् ।
देवी त्वदीय चरणौ शरणं प्रपद्ये
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

गन्धर्व देव ऋषि नारद कौशिकाऽत्रि
व्यासाम्बरीश कलशोद्भव कश्यपाद्याः ।

APR '11

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

भक्त्या स्तुवन्ति निगमागम सूक्त मन्त्रैः
8 भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

9 लीलावचांसि तवदेवि ऋगादि वेदाः
10 सृष्ट्यादि कर्मरचन भवदीय चेष्टा ।
11 त्वत्तेजसा जगदिदं प्रतिभाति नित्यं
12 भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

1 शब्दात्मिके शशिकलाभरणार्धदेहे
2 शम्भोरूरुस्थल निकेतन नित्यवासे ।
3 दारिद्र्य दुःखभयहारिणी का त्वदन्या
4 भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

5 संध्यात्रये सकलभूसुर सेव्यमाने
6 स्वाहा स्वधासि पितृदेवगणार्तिहन्त्री ।
जायाः सुताः परिजनातिथयोन्यकामाः
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

सद्भक्त कल्पलतिके भुवनैकवन्द्ये
भूतेश हृतकमलमग्न कुचाग्रभृंगे ।
कारुण्यपूर्ण नयनेकिमुपेक्षसे माम्
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

अम्ब त्वदीय चरणाम्बुज संश्रयेण
ब्रह्मादयोप्यविकलां श्रियमाश्रयन्ते ।
तस्मादहं तव नतोस्मि पदारविन्दे
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

एकाग्रमूलनिलयस्त महेश्वरस्य
प्राणेश्वरी प्रणत भक्त जनायशीघ्रम् ।
कामाक्षि रक्षित जगत् त्रितयेन्नपूर्णे
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥

भक्त्या पठन्ति गिरिजादशकं प्रभाते, मोक्षार्थिनो बहुजनाः प्रथितोन्नकामाः ।
प्रीता महेश वनिता हिमशैलकन्या, तेषा ददाति सुतरां मनसेप्सितानि ॥

जय गिरिनन्दिनि

महालक्ष्म्यष्टकम

श्री

15

DAY 105-260

FRIDAY

Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
44	24	25	26	27	28	29	

नमस्तुऽस्तु महामाये श्रीपीठे सुरपूजिते ।

8 शङ्खचक्रगदहस्ते महालक्ष्मि नमोऽस्तु ते ॥

9 नमस्ते गरुडारूढे कोलासुरभयङ्करि ।

10 सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥

11 सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करी ।

12 सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥

1 सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।

2 मन्त्रपूते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥

3 आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि ।

4 योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥

5 स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे ।

6 महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।

परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥

श्वेताम्बरधरे देवि नानालङ्कारभूषिते । जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥

श्रीमहिषासुरमर्दिनीस्तोत्रम्

Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

अयि गिरि नन्दिनी नन्दितमेदिनि विश्वविनोदिनि नन्दनुते
गिरिवर विन्ध्यशिरोऽधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठ कुटुम्बिनि भूरि कुटुम्बिनि भूरिकृते
जय जय हे महिषासुमर्दिनि रम्यकपर्दिनि शैलसुते ॥

सुरवर वर्षिणि दुर्धरधर्षिणि दुर्मुख मर्षिणि हर्षरते
त्रिभुवन पोषिणि शङ्करतोषिणि किल्बिषमोषिणि घोषरते ।
दनुज निरोषिणि दितिसुत रोषिणि दुर्मद शोषिणि सिन्धुसुते
जय जय हे ० ॥

अयि जगदम्ब मदम्ब कदम्बवनप्रिय वासिनि हासरते
शिखरिशिरोमणि तुङ्गहिमालय शृङ्गनिजालय मध्यगते ।
मधुमधुरे मधुकैटभ गञ्जिनि कैटभ भञ्जिनि रासरते

जय जय हे ० ॥

अयि शतखण्ड विखण्डित रुण्ड वितुण्डित शुण्ड गजाधिपते
रिपु गज गण्ड विदारण चण्ड पराक्रम शुण्ड मृगाधिपते ।
निजभुज दण्ड निपातित खण्ड विपातित मुण्ड भटाधिपते
जय जय हे ० ॥

APR '11							
Wk	M	T	W	T	F	S	S
14					1	2	3
15	4	5	6	7	8	9	10
16	11	12	13	14	15	16	17
17	18	19	20	21	22	23	24
18	25	26	27	28	29	30	

अयि रणदुर्मद शत्रुवधोदित दुर्धर निर्जर शक्ति भृते

8 चतुरविचार धुरीण महाशिव दूत कृत प्रमथाधिपते ।

9 दुरित दुरीह दुराशय दुर्मति दानवदूत कृतान्त मते

10 जय जय हे ० ॥

11 अयि शरणागत वैरिवधूवर वीरवराभयदायकरे

12 त्रिभुवनमस्तक शूल विरोधिशिरोऽधि कृतामलशूलकरे ।

1 दुमि दुमि तामर दुन्दुभिनाद मुहुर्मुखरीकृत दिङ्निकरे

2 जय जय हे ० ॥

3 अयि निज हुङ्कृति मात्र निराकृत धूम्रविलोचन धूम्रशते

4 समरविशोषित शोणितबीज समुद्भव शोणित बीजलते

5 शिव शिव ~~शुम्भ~~ शुम्भनिशुम्भ महाहव तर्पित भूत पिशाचरते

6 जय जय हे ० ॥

धनु रनु षङ्ग रणक्षण सङ्ग परिस्फुर दङ्ग नटत्कटके
कनकपि शङ्ग पृषत्कनि षङ्ग रसद्भट शृङ्ग हता बटुके ।
कृतचतुरङ्ग बलक्षिति रङ्ग घटद्बहु रङ्ग रटद बटुके
जय जय हे ० ॥

जय जय जप्यजये जयशब्द परस्तुति तत्पर विश्वनुते
झणझण झिञ्झिमि झिङ्कृत नूपुर शिञ्जित मोहित भूतपते ।
नटित नटार्ध नटीनटनायक नाटितनाट्य सुगानरते
जय जय हे ०

अयि सुमनः सुमनः सुमनः सुमनः सुमनोहर कान्तियुते
श्रितरजनी रजनी रजनी रजनी रजनीकर वक्त्रवृते ।
सुनयनविभ्रमर भ्रमर भ्रमर भ्रमर भ्रमराधिपते
जय जय हे ० ॥

महितमहाहववल्लभ तल्लिक वल्लित रल्लित भल्लिरते
विरचित वल्लिक पल्लिक मल्लिक झिल्लिक भिल्लिक वर्गवृते ।
श्रुतकृत फुल्लस मुल्लसितारुण तल्लज पल्लव सल्ललिते
जय जय हे ० ॥

अविरल गण्ड गलन्मद मेदुर मत्तमतङ्गजराजपते
त्रिभुवनभूषण भूतकलानिधि रूपपयोनिधिराजसुते ।
अयि सुदतीजनलालसमान समोहन मन्मथराजसुते
जय जय हे ० ॥

कमलदलामलकोमल कान्तिकलाकलितामल भालतले
सकलविलासकलानिलयक्रमकेलि चलत्कल हंसकुले ।
अलिकुल सङ्कुल कुवलय मण्डल मौलि मिलद बकुलालि कुले
जय जय हे० ॥

कर मुरलीरव वीजित कूजित लज्जित कोकिल मञ्जुमते
मिलित पुलिन्द मनोहर गुञ्जित रञ्जित शैल निकुञ्जगते ।
निजगणभूत महाशबरी गणरङ्गण सम्भृत केलिरते
जय जय हे० ॥

कटि तट पीत दुकूल विचित्र मयूख तिरस्कृत चण्डरुचे
प्रणत सुरासुर मौलि मणिस्फुरदंशुल सन्नख चन्द्ररुचे ।
जितकनकाचल मौलि मदोर्जित निर्भर कुञ्जर कुम्भकुचे
जय जय हे० ॥

विजित सहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृतसुरतारक सङ्गरतारक सङ्गरतारक सूनुसुते ।
सुरथ समाधि, समान समाधि समाधि समाधि सुजातरते
जय जय हे० ॥

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे

8 अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।

9 तव पदमेव ~~परम्पदमि~~ परम्पदमित्य-नुशीलयतो मम किं न शिवे

10 जय जय हे ॥

11 कनक लसत्कलशी कजलैरनुषिञ्चति तेऽङ्गणरङ्ग भुवं

12 भजति स किं न शचीकुच कुम्भ तटी परिरम्भ सुखानुभवम् ।

1 तव चरणं शरणं करवाणि मृडानि सदा मयि देहि शिवं

2 जय जय हे ॥

3 तव विमलेन्दु कुलं वदनेन्दु मलं सकलं ननु कूलयते

4 किमु पुरुहूत पुरीन्दु मुखी सुमुखीभिरसौ विमुखी क्रियते ।

5 मम तु मतं शिवनाम धने भवती कृपया किमु न क्रियते

6 जय जय हे ॥

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथानुमितासिरते ।
यदुचितमत्र भवत्युररी कुरुता दुरुतापमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

श्रीकालिकास्तोत्रम्

ध्यानम्

मेघाङ्गीं विगताम्बरां शवशिवारूढां त्रिनेत्रां परां
कर्णालम्बिनृमुण्डयुग्मभयदां मुण्डस्रजां भीषणाम् ।
वामाधोर्ध्वकराम्बुजे नरशिरः खड्गं च सव्येतरे
दानाभीति विमुक्तकेशनिचयां वन्दे सदा कालिकाम् ॥

स्तोत्रम्

त्वं परा प्रकृतिः साक्षाद्ब्रह्मणः परमात्मनः ।
त्वत्तो जातं जगत्सर्वं त्वं जगज्जननी शिवे ॥

महदाद्यणुपर्यन्तं यदेतत्सचराचरम् ।
त्वयैवोत्पादितं भद्रे त्वदधीनमिदं जगत् ॥

त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभूः ।
त्वं जानासि जगत्सर्वं न त्वां जानाति कश्चन ॥

त्वं काली तारिणी दुर्गा षोडशी भुवनेश्वरी ।
धूमावती त्वं वगला भैरवी छिन्नमस्तका ॥

त्वमन्नपूर्णा वाग्देवी त्वं देवी कमलालया ।
सर्वशक्तिस्वरूपा त्वं सर्वदेवमयी तनुः ॥
त्वमेव सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्तस्वरूपिणी ।
निराकारापि साकारा कस्त्वां वेदितुमर्हति ॥
उपासकानां कार्यार्थं श्रेयसे जगतामपि ।
दानवानां विनाशाय धत्से नानाविधास्तनूः ॥
चतुर्भुजा त्वं द्विभुजा षडभुजाष्टभुजा तथा ।
त्वमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी ॥
त्वं सर्वरूपिणी देवी सर्वेषां जननी परा ।
तुष्टायां त्वयि देवेशि सर्वेषां तोषणं भवेत् ॥
सृष्टेरादौ त्वमेकासीत्तमोरूपमगोचरम् ।

त्वत्तो जातं जगत्सर्गं परब्रह्मसिसृक्षया ॥
महत्तत्त्वादिभूतान्तं त्वया सृष्टमिदं जगत ।
निमित्तमात्रं तद्ब्रह्म सर्वकारणकारणम् ॥

सद्रूपं सर्वतोव्यापि सर्वमावृत्य तिष्ठति ।

8 सदैकरूपं चिन्मात्रं निर्लिप्तं सर्ववस्तुषु ॥

9 न करोति न चाश्नाति न गच्छति न तिष्ठति ।

10 सत्यं ज्ञानमनाद्यन्तम वाङ्मनसगोचरम् ॥

11 त्वस्येच्छामात्रमालम्ब्य त्वं महायोगिनी परा ।

12 करोषि पासि हंस्यन्ते जगदेतच्चराचरम् ॥

1 तव रूपं महाकालो जगत्संहारकारकः ।

2 महासंहारसमये कालः सर्वं ग्रसिष्यति ॥

3 कलनात्सर्वभूतानां महाकालः प्रकीर्तितः ।

4 महाकालस्य कलनात्त्वमाद्या कालिका परा ॥

5 कालसङ्ग्रसनात्काली सर्वषामादिरूपिणी ।

6 कालत्वादादि भूतत्वादाद्या कालीति गीयते ॥

पुनः स्वरूपमासाद्य तमोरूपं निराकृति ।
वाचातीतं मनोऽगम्यं त्वमेकैवावशिष्यसे ॥

साकारापि निराकारा मायया बहुरूपिणी ।
त्वं सर्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका ॥

देवीस्तुतिः

चतुर्थोऽध्यायः

ध्यानम्

ॐ कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥

ॐ ह्रीं ऋषिरुवाच

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय

नाशाय चाशुभभयस्य मतिं करोतु ॥

या श्री स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नता स्म परिपालय देवि विश्वम् ॥

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥

यस्या समस्तसुरता समुदीरणेन

तृप्ति प्रयाति सकलेषु मुखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि स भगवती परमा हि देवि ॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवी त्रया भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥

Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

MAY '11

02

DAY 122-243

MONDAY

ईषत्सहासममलं परिपूर्णचन्द्र

बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।

अत्यद्भुतं प्रहृतमात्तरुषा तथापि

वक्त्रं विलोक्य सहसा महिषासुरेण ॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-

मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।

प्राणान्मुमोच महिषस्तदतीव चित्रं

कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥

देवी प्रसीद परमा भवती भवाय

सद्यो विनाशयसि कोपवती कुलानि ।

विज्ञातमेतदधुनैव यदस्तमेत-

न्नीतं बलं सुविपुलं महिषासुरस्य ॥

ते सम्मता जनपदेषु धनानि तेषां

तेषां यशांसि न च सीदति धर्मवर्गः ।

धन्यास्त एव निभृतात्मजभृत्यदारा
येषा सदाभ्युदयदा भवती प्रसन्ना ॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रै
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र

JUN '11

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनेत्रयेऽपि ॥


त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपिहत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्तम-
स्माकमुन्मदसुरारिभवं नमस्ते ॥

शूलेन पाहि नो देवि पाहि खडगेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिः स्वनेन च ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष ~~दक्ष~~ दक्षिणे ।
भ्रामणेनात्मशूलस्य चोत्तरस्यां तथेश्वरि ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥



Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥

विधेरज्ञानेन द्रविणविरहेणलसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो ० ॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया

तथापि त्वं स्नेहं मयि निरूपमं यत्प्रकुरुषे
कुपुत्रो॰ ॥

परित्यक्ता देवा विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकन्कैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पुशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानी त्वत पाणिग्रहणपरिपाटीफलमिदम् ॥

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥

नराधितासि विधिना विविधोपचारैः
किं रूक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥

आपत्सु मग्नः स्मरणं त्वदीयं
करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः
क्षुधातृषार्ता जननीं स्मरन्ति ॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥

गौरीस्तुति

ॐ लीलारब्धस्थापित-लुप्तखिललोकां
लोकातीतैर् योगिभिरन्तर हृदि मृग्याम् ।
बालादित्य-श्रेणि समान द्युतिपुंजां
गौरीं अम्बां अम्बुरुहाक्षीं अहं ईडे ॥

आशापाश क्लेशविनाशं विदधानां
पादाम्बोजध्यान पराणां पुरुषाणाम् ।
ईशीं ईशार्धाङ्गहरां तां तनुमध्याम् ॥गौरीं॥

प्रत्याहार ध्यान समाधि स्थिति भाजां
नित्यं चित्ते निर्वृत्ति काष्ठां कलयन्तीम् ।
स्त्य ज्ञानानन्दमयीं तां अभिवन्ध्याम् ॥गौरीं॥

चन्द्रापीडानन्दित मन्द स्मित वक्त्रां
चन्द्रापीडालङ्कृत लोलालकभाराम् ।
इन्द्रोपेन्द्राभ्यर्चित पादाम्बुज-युग्माम् ॥गौरीं॥

नानाकारैः शक्तिकदम्बैर्भुवनानि

व्याप्य स्वैरं क्रीडति याऽसौ स्वयमेव ।
कल्याणीं तां कल्पलतामानति भाजाम् ॥गौरीं॥

मूलाधारात् उत्थितवन्तीं विधि रन्ध्रं
सौरं चान्द्रं धाम विहाय ज्वलिताङ्गीम् ।
स्थूलां सूक्ष्मां सूक्ष्मतनुं तां तडित् आभाम् ॥गौरीं॥

आदि क्षान्ताम् अक्षर मूर्त्या विलसन्तीं
भूते भूते भूतकदम्बं प्रसवित्रीम् ।
शब्द ब्रह्मानन्दमयीं तां प्रणवाख्याम् ॥गौरीं॥

यस्या कुक्षौ लीनम-अखण्डं जगत् अण्डं
भूयो भूयः प्रादुर-अभूत्-अक्षतम् एव
भर्त्रा सार्धं तां स्फटिकाद्रौ विहरन्तीम् ॥गौरीं॥

यस्याम् एतत् प्रोतम् अशेषं मणिमाला
सूत्रे यत्-वत् क्वापि चरं क्वाप्यचरं च ।
तां अध्यात्म-ध्यान-पदव्या गमनीयाम् ॥गौरीं॥

नित्यः सत्यो निष्कल एको जगत् ईशः
साक्षी यस्या सर्गविधौ संहरणे च ।
विश्वत्राण क्रीडनशीलां शिव पत्नीम् ॥ गौरीं० ॥

प्रातः काले भावविशुद्धः प्रणिदानात्
भक्त्या नित्यं जल्पति गौरी-दशकं यः ।
वाचां सिद्धिं सम्पदम्- उच्चैः शिव-भक्तिं ॥ गौरीं० ॥

स्वस्ति प्रजाभ्यः परिपालयन्ताम् ।
नयारय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं ।
लोकाः समस्ताः सुखिनो भवन्तु ॥

काले वर्षतु पर्जन्यः ।
पृथिवी सस्य् शालिनी ॥
देशोऽयं क्षोभरहितः
ब्राह्मणास्सन्तु निर्भयाः ॥

सर्वे भवन्तु सुखिनः
सर्वे सन्तु ~~निरामया~~ निरामया ।
सर्वे भद्राणि पश्यन्तु
मा कश्चिद् दुःखभाग भवेत

ॐ शान्तिः शान्तिः शान्तिः

अर्धनारीश्वरस्तोत्रम

ॐ नमः शिवाय

चाम्पेय गौरार्ध शरीरकायै कर्पूरगौरार्ध शरीरकाय।
धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय॥

कस्तूरिकाकुङ्कुमचर्च्चितायै चितराजः पुञ्जविचर्च्चिताय ।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय॥

झणत्कणत्कङ्कण नुपुरायै पादाब्जराजत्फणि नुपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै च नमः शिवाय॥

विशालनीलोत्पललोचनायै विकासिपङ्केरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः शिवायै च नमः शिवाय॥

मन्दारमालाकलितालकायै कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय॥

अम्भोधरश्यामलकुन्तलायै तटित्प्रभाताम्रजटधराय ।
निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय॥

प्रपञ्च सृष्ट्युन्मुखलास्यकायै समस्तसंहारक ताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे नमः शिवायै च नमः शिवाय॥

प्रदीपतरत्नोज्जवलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।

शिवान्वितायै च शिवान्विताय नमः शिवायै च नम शिवाय ॥

एतत्पठेदष्टकमिष्टदं यो भक्तया स मान्यो भुवि दीर्घजीवी ।

प्राप्नोति सौभाग्यमनन्तकालं भूयात्सदा तस्य समस्तसिद्धिः ॥

उमामहेश्वरस्तोत्रम्

नमः शिवाभ्यां नवयौवनाभ्यां - परस्पराश्लिष्ट वपुर्धराभ्याम् ।

नगेन्द्रकन्यावृषकेतनाभ्यां - नमो नमः शङ्करपार्वतीभ्याम् ॥

नमः शिवाभ्यां सरसोत्सवाभ्यां - नमस्कृताभीष्टवरप्रदाभ्याम् ।

नारायणेनार्चितपादुकाभ्यां - नमो नमः शङ्करपार्वतीभ्याम् ॥

नमः शिवाभ्यां वृषवाहनाभ्यां - विरिञ्चिविष्ण्विन्द्रसुपूजिताभ्याम् ।

विभूतिपाटीरविलेपनाभ्यां - नमो नमः शङ्करपार्वतीभ्याम् ॥

नमः शिवाभ्या जगदीश्वराभ्याम् - जगत्पतिभ्यां जयविग्रहाभ्याम् ।

जम्भारि मुख्यैरभिवन्दिताभ्यां - नमो नमः शङ्कपार्वतीभ्याम् ॥

नमः शिवाभ्यां परमौषधाभ्यां - पञ्चाक्षरी पञ्जररञ्जिताभ्याम् ।

MAY '11							
Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

प्रपञ्च सृष्टिस्थिति संहृताभ्यां - नमो नमः शङ्करपार्वतीभ्याम् ॥

8 नमः शिवाभ्यां अतिसुन्दराभ्यां - अत्यन्तमासक्त हृदम्बुजाभ्याम् ।

9 अशेषलोकैकहितङ्कराभ्यां - नमो नमः शंकरपार्वतीभ्याम् ॥

10 नमः शिवाभ्यां कलिनाशनाभ्यां - कङ्कालकल्याणवपुर्धराभ्याम् ।

11 कैलासशैलस्थितदेवताभ्यां - नमो नमः शङ्करपार्वतीभ्याम् ॥

12 नमः शिवाभ्यामशुभापहाभ्याम् - अशेषलोकैकविशेषिताभ्याम् ।

1 अकुण्ठिताभ्यां स्मृतिसंभृताभ्यां - नमो नमः शंकरपार्वतीभ्याम् ॥

2 नमः शिवाभ्यां रथवाहनाभ्यां - रवीन्दुवैश्वानरलोचनाभ्याम् ।

3 राका शशाङ्काभ मुखाम्बुजाभ्यां - नमो नमः शंकरपार्वतीभ्याम् ॥

4 नमः शिवाभ्यां जटिलन्धराभ्यां - जरामृतिभ्यां च विवर्जिताभ्याम् ।

5 जनार्दनाब्जोद्भवपूजिताभ्यां - नमो नमः शंकरपार्वतीभ्याम् ॥

6 नमः शिवाभ्यां विषमेक्षणाभ्यां - बिल्वच्छदामल्लिकदामभृद्भ्याम् ।

शोभावती शान्तवतीश्वराभ्यां - नमो नमः शंकरपार्वतीभ्याम् ॥

नमः शिवाभ्यां पशुपालकाभ्यां - जगत्त्रयीरक्षण बद्धहृद्भ्याम् ।

समस्त देवासुरपूजिताभ्यां - नमो नमः शङ्करपार्वतीभ्याम् ॥

स्तोत्रं त्रिसन्ध्यं शिवपार्वतीभ्यां - भक्त्या पठेद् द्वादशकं नरो यः ।

स सर्वसौभाग्य फलानि भुङ्क्ते शतायुरन्ते शिलोकमेति ॥

दारिद्र्यदहनशिवस्तोत्रम्

विश्वेश्वराय नरकार्णवतारणाय, कर्णामृताय शशिशेखरभूषणाय ।

कर्पूरकुन्दधवलाय जटाधराय, दारिद्र्यदुःख दहनाय नमः शिवाय ॥

गौरीप्रियाय रजनीशकलाधराय, कालान्तकाय भुजगाधिपकङ्कणाय ।

गङ्गाधराय गजराजविमर्दनाय, दारिद्र्यदुःख दहनाय नमः शिवाय ॥

भक्तिप्रियाय भवरोगभयापहाय, उग्राय दुर्गभवसागरतारणाय ।

ज्योतिर्मयाय पुनरुद्भववारणाय, दारिद्र्यदुःख दहनाय नमः शिवाय ॥

चर्माम्बराय शवभस्मविलेपनाय भालेक्षणाय फणिकुण्डलमण्डिताय ।

मञ्जीरपादयुगलाय जटाधराय, दारिद्र्यदुःख दहनाय नमः शिवाय ॥

पञ्चाननाय फणिराजविभूषणाय, हेमांशुकाय भुवनत्रयमण्डनाय ।

MAY '11

Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

25

DAY 145-220

WEDNESDAY

आनन्दभूमिवरदाय तमोहराय, दारिद्र्यदुःख दहनाय नमः शिवाय ॥

8 भानुप्रियाय दुरितार्णवतारणाय, कालान्तकाय कमलासनपूजिताय ।

9 नेत्रत्रयाय शुभलक्षणलक्षिताय, दारिद्र्यदुःख दहनाय नमःशिवाय ॥

10 रामप्रियाय रघुनाथवरप्रदाय, नागप्रियाय नागराज निकेतनाय ।

11 पुण्याय पुण्यचरिताय सुरार्चिताय, दारिद्र्यदुःख दहनाय नमः शिवाय ॥

12 मुक्तीश्वराय फलदाय गणेश्वराय, गीतप्रियाय वृषभेश्वरवाहनाय ।

1 मातङ्गचर्मवसनाय महेश्वराय, दारिद्र्यदुःख दहनाय नमः शिवाय ॥

2 गौरीविलास भुवनाय महोदयाय, पञ्चाननाय शरणागत रक्षकाय ।

3 शर्वाय सर्वजगतामधिपाय तस्मै, दारिद्र्यदुःखदहनाय नमःशिवाय ॥

4

5

6



शिवमानसपूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
8 नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
9 जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
10 दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥

11 सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
12 भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
1 शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
2 ताम्बूलं मनसा मया विरचितं भक्त्या प्रभू स्वीकुरू ॥

3 छत्रं चामरयोर्युगं व्यजनकं चादर्शक निर्मलं
4 वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
5 साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
6 सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।

सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधं
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो

वेदसारशिवस्तवः

पशूनां पतिं पापनाशं परेशं गजेन्द्रस्य कत्तिं वसानं वरेण्यम् ।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं महादेवमेकं स्मरामि स्मरारिम् ॥

महेशं सुरेशं सुरारार्तिनाशं विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥

गिरीशं गणेशं गले नीलवर्णं गवेन्द्राधिरूढं गुणातीतरूपम् ।
भवं भास्वरं भस्मना भूषिताङ्गं भवानीकलत्रं भजे पञ्चवक्त्रम् ॥

शिवाकान्त शम्भो शशाङ्कार्धमौले महेशान शूलिन् जटाजूटधारिन् ।

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

DAY 148-217

28

SATURDAY

त्वमेको जगद्व्यापको विश्वरूप प्रसीद प्रसीद प्रभो पूर्णरूप ॥

8 परात्मानमेकं जगद्बीजमाद्यं निरीहं निराकारमोङ्कारवेद्यम् ।

9 यतो जायते पाल्यते येन विश्वं, तमीशं भजे लीयते यत्र विश्वम् ॥

10 न भूमिर्न न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तन्द्रा न निद्रा ।

11 न ग्रीष्मो न शीतं न देशो न वेषो न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥

12 अजं शाश्वतं कारणं कारणानां शिवं केवलं भासकं भासकानाम ।

1 तुरीयं तमः पारमाद्यन्तहीनं प्रपद्ये परं पावनं द्वैतहीनम् ॥

2 नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते चिदानन्दमूर्ते ।

3 नमस्ते नमस्ते तपोयोगगम्य नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥

प्रभो शूलपाने विभो विश्वनाथ महादेव शम्भो महेश त्रिनेत्र ।

शिवाकान्त शान्त स्मरारे पुरारे त्वदन्यो वरेन्यो न मान्यो न गण्यः ॥

DAY 149-216

29

SUNDAY

शम्भो महेश करुणामय शूलपाणे गौरीपते पशुपते पशुपाशनाशिन् ।
काशीपते करुणया जगदेतदेकस्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥

त्वतो जगद्भवति देव भव स्मरारे त्वय्येव तिष्ठति जगन्मृड विश्वनाथ ।
त्वय्येव गच्छति लयं जगदेतदीश लिङ्गात्मकं हर चराचरविश्वरूपिन् ॥

ॐ नमः शिवाय

Wk	M	T	W	T	F	S	S
18/23	30	31					1
19	2	3	4	5	6	7	8
20	9	10	11	12	13	14	15
21	16	17	18	19	20	21	22
22	23	24	25	26	27	28	29

श्रीपशुपत्यष्टकम्

ध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यम् निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

स्तोत्रम्

पशुपतिं द्युपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम् ।
प्रणतभक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम् ॥

न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम् ।
अवति कोऽपि न कालवशं गतं भजत रे मनुजा गिरजापतिम् ॥

मुरजडिण्डिमवाद्यविलक्षणं मधुरपञ्चमनादविशारदम् ।
प्रमथभूतगणैरपि सेवितं भजत रे मनुजा गिरजापतिम् ॥

शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नतं नृणाम् ।
अभयदं करुणावरुणालयं भजत रे मनुजा गिरिजापतिम् ॥

नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वषभध्वजम् ।

चितिरजोधवलीकृतविग्रहं भजत रे मनुजा गिरिजापतिम् ॥

मखविनाशकरं शशिशेखरं सततमध्वरभाजि फलप्रदम् ।
प्रलयदग्धसुरासुरमानवं भजत रे मनुजा गिरिजापतिम् ॥

मदमपास्य चिरं हृदि संस्थितं मरणजन्मजराभयपीडितम् ।
जगदुदीक्ष्य समीपभयाकुलं भजत रे मनुजा गिरिजापतिम् ॥

हरिविरञ्चिसुराधिपपूजितं यमजनेशधनेशनमस्कृतम् ।
त्रिनयनं भुवनत्रितयाधिपं भजत रे मनुजा गिरिजापतिम् ॥

पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवीपतिसूरिणा ।
पठति संशृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम् ॥

श्रीरुद्राष्टकम्

नमामीशमीशान निर्वाणरूपं विभुं व्यापकं ब्रह्म वेदस्वरूपं ।
निजं निर्गुणं निर्विकल्पं निरीहं चिदाकाशमाकाशवासं भजेऽहं ॥

निराकारमोङ्कारमूलं तुरीयं गिरा ग्यान गोतीतमीशं गिरीशम् ।
करालं महाकाल कालं कृपालं गुणागार संसारपारं नतोऽहं ॥

तुषाराद्रि संकाश गौरं गभीरं मनोभूत कोटि प्रभा श्री शरीरं ।
8 स्फुरन्मौलि कल्लोलिनी चारु गंगा लसद्भालबालेन्दु कंठे भुजंगा ॥

9 चलत्कुंडलं भ्रू सुनेत्रं विशालं प्रसन्नाननं नीलकंठं दयालं ।
10 मृगादीशचर्माम्बरं मुंडमालं प्रियं शंकरं सर्वनाथं भजामि ॥

11 प्रचंडं प्रकृष्टं प्रगल्भं परेशं अखंडं अजं भानुकोटिप्रकाशं ।
12 त्रयः शूल निर्मूलनं शूलपाणिं भजेऽहं भवानपतिं भावगम्यं ॥

1 कलातीत कल्यान कल्पान्तकारी सदा सज्जनानन्ददाता पुरारी ।
2 चिदानंद संदोह मोहापहारी प्रसीद प्रसीद प्रभो मन्मथारी ॥

3 न यावद् उमानथ पादारविन्दं भजंतीह लोके परे वा नराणाम् ।
4 न तावत्सुखं शान्ति सन्तापनाशं प्रसीद प्रभो सर्वभूताधिवासं ॥

5 न जानामि योगं जपं नैव पूजां नतोहं सदा सर्वदा शंभु तुभ्यं ।
6 जरा जन्म दुःखोघ तातप्यमानं प्रभो पाहि आपान्नमामीश शंभो ॥

रुद्राष्टकमिदं प्रोक्तं विप्रण हरतोषये ।
ये पठन्ति नर भक्त्या तेषां शम्भुः प्रसीदति ॥

शिवषडक्षरस्तोत्रम्

ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव ॐकाराय नमो नमः ॥


नमन्ति ऋषयो देवा नमन्त्यप्सरसां गणाः ।
नरा नमन्ति देवेशं नकाराय नमो नमः ॥

महादेवं महात्मानं महाध्यानपरायणम् ।
महापापहरं देवं मकाराय नमो नमः ॥

शिवं शान्तं जगन्नाथं लोकानुग्रहकारकम् ।
शिवमेकपदं नित्यं शिकाराय नमो नमः ॥

वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम ।
वामे शक्तिधरं देवं वाकाराय नमो नमः ॥

यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः ।
यो गुरुः सर्वदेवानां यकाराय नमो नमः ॥



श्रीशिवस्तुति

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे सवजगद्विहारमतुलं वन्देऽन्धकध्वंसिनं
वन्दे देवशिखामणिं शशिनिभं वन्दे हरेर्वल्लभम् ।
वन्दे नागभुजङ्गभूषणधरं वन्दे शिवं चिन्मयं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे दिव्यमचिन्तमद्वयमहं वन्देऽर्कदर्पापहं
वन्दे निर्मलमादिमूलमनिशं वन्दे मखध्वंसिनम् ।
वन्दे सत्यमनन्तमाद्यमभयं वन्दे अति शान्ताकृतिं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे भूरथमम्बुजाक्षविशिखं वन्दे श्रुतित्रोटकं
वन्दे शैलशरासनं फणिगुणं वन्देऽधितूणीरकम् ।

वन्दे पङ्कजासारथिं पुरहरं वन्दे महाभैरवं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे पञ्चमुखाम्बुजं त्रिनयनं वन्दे ललाटेक्षणं
वन्दे व्योमगतं जटासुमुकुटं चन्द्रार्धगङ्गाधरम् ।
वन्दे भस्मकृतत्रिपुण्ड्रजटिलं वन्देष्टमूर्त्यात्मकं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे कालहरं हरं विषधरं वन्दे मृड़ं धूर्जटिं
वन्दे सर्वगतं दयामृतनिधिं वन्दे नृसिंहापहम् ।
वन्दे विप्रसुरार्चिताङ्घ्रिकमलं वन्दे भगाक्षापहं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे मङ्गलराजताद्रिनिलयं वन्दे सुराधीश्वरम्
वन्दे शङ्करमप्रमेयमतुलं वन्दे यमद्वेषिणम् ।
वन्दे कुण्डलिराजकुण्डलधरं वन्दे सहस्राननं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

वन्दे हंसमतीन्द्रियं स्मरहरं वन्दे विरूपेक्षणं
वन्दे भूतगणेशमव्ययमहं वन्देऽर्थराज्यप्रदम् ।
वन्दे सुन्दरसौरभेयगमनं वन्दे त्रिशूलायुधं
वन्दे भक्ताजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे सूक्ष्ममनन्तमाद्यमभयं वन्देऽन्धकारापहं
वन्दे फूलननन्दिभृङ्गिविनतं वन्दे सुपर्णावृतम् ।
वन्दे शैलसुतार्धभागवपुषं वन्देऽभयं त्र्यम्बकं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे पावनमम्बरात्मविभवं वन्दे महेन्द्रेश्वरं
वन्दे भक्तजनाश्रयामरतरुं वन्दे नताभीष्टदम ।
वन्दे जह्नुसुताम्बिकेशमनिशं वन्दे गणाधीश्वरं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

ॐ शान्तिः शान्तिः शान्तिः

शिवनामावल्यष्टकम्

हे चन्द्रचूड मदनान्तक शूलपाने
स्थाणो गिरीश गिरिजेश महेश शम्भो ।
भूतेश भीतभयसूदन मामनाथं
संसारदुःखगहनाज्जगदीश रक्ष ॥

हे पार्वतीहृदयवल्लभ चन्द्रमौले
भूताधिप प्रमथनाथ गिरीशजाप ।
हे वामदेव भव रुद्र पिनाकपाणे
संसारदुःखगहनाज्जगदीश रक्ष ॥

हे नीलकण्ठ वृषभध्वज पञ्चवक्त्र
लोकेश शेषवलयं प्रथमेश शर्व ।
हे धूर्जटे पशुपते गिरिजापते मां
संसारदुःखगहनाज्जगदीश रक्ष ॥

हे विश्वनाथ शिव शंकर देवदेव
गङ्गाधर प्रमथनायक नन्दिकेश ।

JUN '11

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

बामेश्वरान्धकरिपो हर लोकनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥

वाराणसीपुरपते मणिकर्णिकेश
वीरेश दक्षमखकाल विभो गणेश ।
सर्वज्ञ सर्वहृदयैकनिवास नाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥

श्रीमन् महेश्वर कृपामय हे दयालो
हे व्योमकेश शितिकण्ठ गणाधिनाथ ।
भस्माङ्गरागनृकपालकलापमाल
संसारदुःखगहनाज्जगदीश रक्ष ॥

कैलासशैलविनिवास वृषाकपे हे
मृत्युञ्जय त्रिनयन त्रिजगन्निवास ।
नारायणप्रिय मदापह शक्तिनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥

विश्वेश विश्वभवनाशक विश्वरूप
विश्वात्मक त्रिभुवनैकगुणाभिवेश ।
हे विश्वबन्धु करुणामय दीनबन्धो
संसारदुःखगहाज्जगदीश रक्ष ॥

गौरीविलासभवनाय महेश्वराय
पञ्चाननाय शरणागतरक्षकाय ।
शर्वाय सर्वजगताम्‌धिपाय तस्मै
दारिद्र्यदुःखदहनाय नमः शिवाय

एकादश रुद्रपूजा

ॐ अघोराय नमः ॥१॥ ॐ पशुपतये नमः ॥२॥
ॐ शर्वाय नमः ॥३॥ ॐ विरूपाक्षाय नमः ॥४॥
ॐ विश्वरूपिणे नमः ॥५॥ ॐ त्र्यम्बकाय नमः ॥६॥
ॐ कपर्दिने नमः ॥७॥ ॐ भैरवाय नमः ॥८॥
ॐ शूलपाणये नमः ॥९॥ ॐ ईशानाय नम ॥१०॥
ॐ महेश्वराय नमः ॥११॥

शिवमहिम्नःस्तोत्रम्

ॐ नमः शिवाय

आधीनाममगाधं दिव्यं व्याधीनां मूलकृन्तनं
उपद्रवाणां दलनं महादेवमुपास्महे ॥

अहं पापी पापक्षपणनिपुणः शङ्कर भवान्
अहं भीतो भीताभयवितरणे ते व्यसनिता ।
अहं दीनो दीनोद्धरण विधि सज्जस्त्वमितरन्
न जानेऽहं वक्तुं कुरू सकल शोच्ये मयि कृपाम् ॥

जनस्त्वत्पादाब्जश्रवणमननध्याननिपुणः
स्वयं ते निस्तीर्णा न खलु करूणा तेषु करणा ।
भवेलीने दीने मयि मननहीने न करूणा
कथं नाथ ख्यातस्त्वमसि करूणासागर इति ॥

ॐ श्री पुष्पदन्त उवाच ॥

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः

पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥

8 मधुस्फीता वाचः परमममृतं निर्मितवत-

9 स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।

10 मम त्वेतां वाणीं गुणकथनपुण्येन भवतः

11 पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥

12 तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत

1 त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु ।

2 अभव्यानामस्मिन् वरद रमणीयामरमणीं

3 विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं

किमाधारो धाता सृजति किमुपादान इति च ।

अतर्क्यैश्वर्ये त्वय्यनवसदुःस्थो हतधियः

कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-

मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने ~~पक्षु~~ परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति च भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥

ध्रुवं कश्चित सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव

स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥

तवैश्वर्यं यत्नाद् यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद् बाहूनभृत रणकण्डूपरवशान् ।
शिरः पद्मश्रेणीरचितचरणाम्भोरूहबले
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥

यदृद्धिं सुत्रामणो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः ॥

न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
8 र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनति ॥

9 अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा
10 विधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः ।
11 स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
12 विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥

1 असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
2 निवर्तन्ते नित्यं जगति जयनो यस्य विशिखाः ।
3 न पश्यन्नीश त्वामितरसुरसाधारणमभूत
4 स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः ॥

5 मही पादाघाताद् व्रजति सहसा संशयपदं
6 पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौःस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद् द्वीपाकारम् जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोयं त्रिपुतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।

JUN '11

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रतौ श्रद्धा बद्ध्वा दृढपरिकरः कर्मसुजनः ॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृताम्
ऋषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥

अपूर्वं लावण्यं विवसनतनोस्ते विमृशताम्
मुनीनां दाराणां समजनि स कोपव्यतिकरः ।
यतोभग्ने गुह्ये सकृदऽपि सपर्यां विदधतां
ध्रुवं मोक्षोऽश्लीलं किमऽपि पुरूषार्थं प्रसवि ते ॥

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना-
दवैति त्वामद्धा वत वरद मुग्धा युवतयः ॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये

दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।

परिच्छिन्नामेवं त्वयि परिणता विभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते ॥

वपुष्प्रादुर्भावादऽनुमितमिदं जन्मनि पुरा
पुरारे नैवाहं क्वचिदपि भवन्तं प्रणतवान ।
नमन्मुक्तः सम्प्रत्यतनुरऽहमऽग्रेप्यनतिमान्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥

सुरभुजगनरन्द्रैरर्चितस्येन्दुमौलेः
प्रथितगुणगरिम्णो ज्ञानकारुण्यमूर्तेः ।
सकलगुणवरेण्यः पुष्पदन्ताऽभिधानो
न्यदधदऽलघुवृत्तै स्तोत्रमेतद्दुरीय ॥

असितगिरिसमं स्यात कज्जलं सिन्धु पात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।

लिखति यदि गृहीत्वा शारदा सर्वकालं
8 तदपि तव गुणानामीश पारं न याति ॥

9 असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
10 र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
11 सकलगणवरिष्ठः पुष्पदन्ताभिधानो
12 रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥

1 अहरहरनवद्यं धूर्जटेः स्तोत्रमेत
2 पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।
3 स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
4 प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च ॥

5 दीक्षा दानं तपस्तीर्थं ज्ञानंयोगादिकाःक्रिया ।
6 महिम्नस्तव पाठस्य कलां नार्हन्ति षोडशीम ॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोःपरम् ॥

JUL '11

Wk	M	T	W	T	F	S	S
27					1	2	3
28	4	5	6	7	8	9	10
29	11	12	13	14	15	16	17
30	18	19	20	21	22	23	24
31	25	26	27	28	29	30	31

DAY 174-191

THURSDAY

23

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुधरवरमौलेर्देवदेवस्य दासः ।
स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः ॥

सुरगुरूमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैं स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम ॥

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् ।
अनौपम्यं मनोहारि सर्वमीश्वरवर्णनम् ॥

श्रीपुष्पदन्त मुखपङ्कजनिर्गतेन
स्तोत्रेन किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः

इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयो ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥

अभिनवगुप्त कृत शिवस्तुतिः

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

ॐ

व्याप्त चराचर भावविशेषं
चिन्मयम् एकम अनन्तमनादिम् ।
भैरवनाथम् अनाथ शरण्यम्
तन्मय चित्ततया हृदि वन्दे ॥

त्वन्मयमेतत् अशेषमिदानीं
भाति मम त्वत अनुग्रह शक्त्या ।
त्वं च महेश सदैव ममात्मा
स्वात्ममयं मम तेन समस्तम् ॥

स्वात्मनि विश्वगते त्वयि नाथे
तेन न संसृति भीतेः कथास्ति ।
सत् स्वपि दुर्धर दुःख विमोह
त्रासविधायिषु कर्म गणेषु ॥

अन्तकमां प्रतिमा दृशमेनां
क्रोधकरालत्मां विदधीहि ।

Wk	M	T	W	T	F	S	S
27					1	2	3
28	4	5	6	7	8	9	10
29	11	12	13	14	15	16	17
30	18	19	20	21	22	23	24
31	25	26	27	28	29	30	31

DAY 176-189
SATURDAY
25

शङ्करसेवन चिन्तनधीरो
8 भीषणभैरव शक्तिमयोस्मि ॥

9 इत्थमुपोढ भवन्मयसंवित
10 दीधितिदारित-भूरि-तमिस्रः ।
11 मृत्युयमान्तक कर्मपिशाचैः
12 नाथ नमोस्तु न जातु बिभेमि ॥

1 प्रोदित-स्त्य विबोध मरीचि
2 प्रोक्षितविश्व पदार्थसतत्वः ।
3 भाव परामृत निर्भरपूर्णे
त्वय्यहमात्मनि निर्वृतिमेमि ॥

DAY 177-188
SUNDAY
26

मानस गोचरमेति यदैव
कलेश तनु ताप विधात्री ।
नाथ तदैव ममत्वत अभेद
स्तोत्रपरामृत वृष्टिरउदेति ॥

JUN '11

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

शंकर सत्यमिदं व्रतदान
स्नानतपोभव तापविनाशि ।
तावकशास्त्र परामृतचिन्ता
सिध्यति चेतसि निर्वृतिधारा ॥

नृत्यति गायति हृष्यति गाढं
संवितियं मम भैरवनाथ ।
त्वां प्रियं-आप्य सुदर्शनमेकं
दुर्लभम-अन्यजनैः समयज्ञम् ॥

वसुरस पौष कृष्णदशम्यां
अभिनवगुप्तः स्तवम-इममकरोत् ।
येन विभुभवमरुसन्तापं
शमयति झटिति जनस्य दयालुः ॥

ॐ श्री भैरवाय नमः

शिवचामरस्तुति

ओं

अतिभीषण कटुभाषण यमकिङ्कर पटली
कृतताडन परिपीडन मरणागमसमये ।
उमयासह मम चेतसि यमशासन निवसन्
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥

अतिदुर्नय चटुलेन्द्रिय रिपु सञ्चय दलिते
पविकर्कश कटुजल्पित खलगर्हण चलिते ।
शिवयासह ममचेतसि शशिशेखर निवसन
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्

भवभञ्जन सुररञ्जन खलवञ्चन पुरहन्
दनुजान्तक मदनान्तक रविजान्तक भगवन् ।
गिरिजावर करुणाकर परमेश्वर भयहन
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥

शक्रशासन कृतशासन चतुराश्रम विषये
कलिविग्रह भवदुर्ग्रह रिपुदुर्बल समये ।

Wk	M	T	W	T	F	S	S
23			1	2	3	4	5
24	6	7	8	9	10	11	12
25	13	14	15	16	17	18	19
26	20	21	22	23	24	25	26
27	27	28	29	30			

द्विजक्षत्रिय वनिताशिशुदरकम्पित हृदये

8 शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥

9 भवसम्भव विविधामय परिपीडितवपुषं

10 दयितात्मज ममताभर कुलुषीकृतहृदयम् ।

11 करुमां निजचरणार्चन निरतं भव सततं

12 शिवशङ्कर शिवशङ्कर हर मे हर दुरितम् ॥

1 शंकरा चंद्रशेखरा गंगाधरा सुमनोहरा

2 पाहिमाम् अभयंकरा मृत्युंजया विश्वेश्वरा

3 नीलकंठ भालनेत्र भस्मभूषित सुन्दरा

4 पाहिमाम् करूणाकरा परमेश्वरा सर्वेश्वरा

5 शंकरा चंद्रशेखरा गंगाधरा सुमनोहरा

6 पाहिमाम् करूणाकरा परमेश्वरा सर्वेश्वरा

ॐ नमः शिवाय

शिवोऽहं

JUL '11

Wk	M	T	W	T	F	S	S
27					1	2	3
28	4	5	6	7	8	9	10
29	11	12	13	14	15	16	17
30	18	19	20	21	22	23	24
31	25	26	27	28	29	30	31

2011 JUNE

DAY 181-184

THURSDAY 30

निर्वाणषट्कम्

मनोबुद्ध्यहंकार चित्तानि नाहं न च श्रोत्रजिह्वे न च घ्राण नेत्रे
न च व्योमभूमिर्न तेजो न वायु चिदानन्दरूपः शिवोऽहं शिवोऽहं ॥

न च प्राणसंज्ञो न वै पंचवायुः न वा सप्तधातुर्न वा पंचकोशः
न वाक् पाणिपादं न चोपस्थपायुः चिदानन्द० ॥

न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः
न धर्मो न चार्थो न कामो न मोक्षः चिदानन्द० ॥

न पुण्यं न पापं न सौख्यं न दुःखं न मन्त्रो न तीर्थं न वेदा न यज्ञाः
अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्द० ॥

न मृत्युर्न शङ्का न मे जातिभेदः पिता नैव मे नैव माता च जन्म
न बन्धुर्न मित्रं गुरुर्नैव शिष्यः चिदानन्द० ॥

अहं निर्विकल्पो निराकाररूपो विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम्
न चासङ्गतं नैव मुक्तिर्न मेयः चिदानन्द० ॥

जय जय करुणाब्धे
श्री महादेव शम्भो

दशश्लोकि

This bunch of ten verses issued forth from the bosom Adi Shankra when as a young boy he met his Guru, Acharya Govindapada, for the first time. Acharya asked Shankara who he was, and the latters reply was in the form of these ten verses each ending with the words 'Siva Kevaloham' (I am of the form of Pure Consciousness)

न भूमिन्र्नतोयं न तेजो न वायुः
न खं नेन्द्रियं वा न तेषा समूहः ।
अनैकान्तिकत्वात् सुषुप्त्येकसिद्धः
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥

न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणाध्यानयोगादयोऽपि ।
अनात्माश्रयाहं ममाध्यासहानाः तदेकोवशिष्टः ० ॥

न माता पिता व न देवा न लोकाः न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात् तदेकोवशिष्टः ० ॥

न सांख्यं न शैवं न तत् पाञ्चरात्रं न जैनं न मीमांसकादेर्मतं वा ।
विशिष्टानुभूत्या विशुद्धात्मकत्वात् तदेकोऽवशिष्टः ० ॥

न चोर्ध्वं न चाधो न चान्तर्न्न बाह्यं न मध्यं न तिर्यङ् न पूर्वा परा दिक्।
8 वियद्व्यापकत्वात् अखण्डैकरूपः तदेकोऽवशिष्टः ॥

9 न शुक्लं न कृष्णं न रक्तं न पीतं न कुब्जं न पीनं न ह्रस्वं न दीर्घम्।
10 अरूपं तथा ज्योतिराकारकत्वात् तदेकोऽवशिष्टः ॥

11 न शास्ता न शास्त्रं न शिष्यो न शिक्षा। न च त्वं न चाहं न चायं प्रपञ्चः।
12 स्वरूपावबोधो विकल्पासहिष्णुः तदेकोऽवशिष्टः ॥

1 न जाग्रत् न मे स्वप्नको वा सुषुप्ति न विश्वो न वा तैजसः प्राज्ञको वा।
2 अविद्यात्मकत्वात् त्रयाणं तुरीयं तदेकोऽवशिष्टः ॥

3 अपि व्यापकत्वाद्धितत्त्वप्रयोगात् स्वतः सिद्धभावादनन्याश्रयत्वात्।
जगत् तुच्छमेतत् समस्तं तदन्यत् तदेकोऽवशिष्टः ॥

न चैकं तदन्यं द्वितीयं कुतः स्यात् न वा केवलत्वं न चाऽकेवलत्वम्

न शून्यं न चाऽशून्यमद्वैतकत्वात् कथं सर्ववेदान्तसिद्धं ब्रवीमि

जय गुरुदेव

असंगोऽहम्

Wk	M	T	W	T	F	S	S
27					1	2	3
28	4	5	6	7	8	9	10
29	11	12	13	14	15	16	17
30	18	19	20	21	22	23	24
31	25	26	27	28	29	30	31

असंगोऽहं असंगोहं असंगोऽहं पुनः पुनः ।
8
सच्चिदानन्दरूपोऽहं अहमेवाहमव्ययः ॥

Unattached, unattached, unattached am I
again and again; of nature eternal
Existance - Knowledge - Bliss am I, I am
That. That I am, which is the irreducible,
11 immortal and eternal factor

12 नित्यशुद्धविमुक्तोऽहं निराकारोऽहमव्ययः ।

भूमानन्दस्वरूपोऽहं अहमेवाहमव्ययः ॥

Eternal, ever pure, ever liberated am I;
formlessness is my only form; of nature I
3 am all prevading; homogeneous mass of
Ananda (bliss) am I; I am That. That I am,
which is the irreducible, immortal,
eternal factor.

5
नित्योऽहं निरवद्योऽहं निराकारोऽहमच्युतः ।
6
परमानन्दरूपोऽहं अहमेवाहमव्ययः ॥

Eternal, faultless, formless, irreducible am
I; of nature bliss am I, I am That. That I
am which is the irreducible, immortal,
endless factor.

शुद्धचैतन्यरूपोऽहं आत्मारामोऽहमेव च ।

अखण्डानन्दरूपोऽहं अहमेवाहमव्ययः ॥

I am of nature pure light and revel in my own Self; I am by nature unbroken Ananda, I am That. That I am, which is the irreducible, immortal, endless factor.

प्रत्यकचैतन्यरूपोऽहं शान्तोऽहं प्रकृतेः परः ।

शाश्वतानन्दरूपोऽहं अहमेवाहमव्ययः ॥

I am of nature the innermost light of intellegence; I am the peace that lies beyond nature; I am of nature ever-abiding Ananda, I am That. That I am, which is irreducible, immortal, endless factor.

तत्त्वातीतः परात्माहं मध्यातीतः परः शिवः ।

मायातीतः परं ज्योतिः अहमेवामव्ययः ॥

I am the Supreme Truth that lies beyond all other truths. I am the Shiva, ever across the frontiers of Maya (delusion-

JUL '11

Wk	M	T	W	T	F	S	S
27					1	2	3
28	4	5	6	7	8	9	10
29	11	12	13	14	15	16	17
30	18	19	20	21	22	23	24
31	25	26	27	28	29	30	31

that which is not); I am the Supreme light, I am that. That am I, which is the irreducible, immortal endless factor

नानारूपव्यतीतोऽहं चिदाकारोऽहमच्युतः ।

सुखरूपस्वरूपोऽहं अहमेवाहमव्ययः ॥

I am different from the multiple names and forms; pure knowledge alone is my form; I am the impershishable; I am of nature joyous; I am That. That am I, which is the irreducible, immortal, endless factor.

मायातत्कार्यदेहादि मम नास्त्येव सर्वदा ।

स्वप्रकाशैकरूपोऽहं अहमेवाहमव्ययः ॥

Never, never have I the delusion-produced dream stuff, such as body etc. I am of the form of Self-effulgence, I am That. That am I, which is the irreducible, immortal, endless factor

गुणत्रयव्यतीतोऽहं ब्रह्मादीनां च साक्ष्यहम् ।

अनन्तानन्दरूपोऽहं अहमेवाहमव्ययः ॥

I am without the three mortal qualities (Gunas); I am a witness of the very Creator and the Trinity; I am of the form of endless Ananda, I am That. That am I, which is the irreducible, immortal, endless factor.

द्वन्द्वादिसाक्षिरूपोऽहं अचलोऽहं सनातनः ।

सर्वसाक्षिस्वरूपोऽहं अहमेवाहमव्ययः ॥

I am of nature a Witness of all pairs of opposites, immutable, most ancient in my form, ~~I am~~ I am the eternal witness of everything, I am That. That am I which is the irreducible, immortal, endless factor

प्रज्ञानघन एवाहं विज्ञानघन एव च ।

अकर्ताहमभोक्ताहं अहमेवाहमव्ययः ॥

I am a mass of consciousness, I am a mass of knowledge, I am even a non-doer, I am a non-enjoyer, I am That. That am I, which is irreducible, immortal, endless factor.

निराधारस्वरूपोऽहं सर्वाधारोहमेव च ।

आप्तकामस्वरूपोऽहं अहमेवाहमव्ययः ॥

In my real nature, I need no other foundation or support or substratum, but at once I am the foundation, support or substratum of all things and beings, I am of the nature self contented, self sufficient, I am That, That am I, which is the irreducible, immortal, endless factor.

तापत्रयविनिर्मुक्तः देहत्रयविलक्षणः ।

अवस्थात्रयसाक्ष्यस्मि च अहमेवाहमव्ययः ॥

I am beyond the three agonies (subjective or adyatmik, Phenomenal or Adibautik and Cosmic or Adidaivik); I am different from the gross, the subtle and the casual bodies; I am the witness of three states of consciousness, I am That. That am I, which is irreducible, immortal and eternal factor.

दृग्दृश्यौ द्वौ पदार्थौस्तः परस्परविलक्षणौ ।

दृग्ब्रह्म दृश्यं मायेति सर्ववेदान्तडिण्डिमः ॥

There are only two things in the world, the Subject and the Object; the enjoyer and the enjoyed; the experiencer and the experienced or the Seer and the seen, and they are among themselves the most Contrary. Of this, the subject is the Supreme Truth while as Object is mere delusion. The whole Vedenta roars this very truth over the beating of drums.

अहं साक्षीति यो विद्याद् विविच्यैवं पुनः पुनः ।

स एव मुक्ताः स विद्वान् इति वेदान्तडिण्डिमः ॥

Through knowledge and repeated discrimination, one comes to realize that one is but a witness. Such a one, established in the "I-am-witness-Consciousness" is the liberated wise man. So, roars Vedanta on a drum beat.

घट कुडियादिकं सर्वं मृत्तिकामात्रमेव च ।

तद्वद् ब्रह्म जगत्सर्वं इति वेदान्तडिण्डिमः ॥

Pots, Cups, Saucers etc are in essence nothing but the clay of which they

are made. So too the entire world of Phenomena is nothing but the Supreme Truth, So (over Drum, beats) roars Vedanta

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।

अनेन वेद्यं सच्छास्त्रम् इति वेदान्तडिण्डिमः ॥

Brahman is Truth, the world of objects and beings is false and the egocentric sense of separateness is itself nothing other than the Brahman. That by which this Truth is known is the truest Science: the Science of Sciences thus roars Vedanta over the Drum beats.

अन्तर्ज्योतिर् बहिर्ज्योतिः प्रत्यग्ज्योतिः परात्परः ।

ज्योतिर्ज्योतिः स्वयं ज्योतिः आत्मज्योतिः शिवोऽस्म्यहम् ॥

I am light within, I am light without, innermost light am I and I am the Supreme. I am the light of lights, Self effulgent, the light of the Self. I am auspiciousness!

ॐ

हस्तामलकीयम्

श्री शंकरः -

कस्त्वं शिशो कस्य कुतोऽसि गन्ता
किं नाम ते त्वं कुत आगतोऽसि ।
एतन्मयोक्तं वद चार्भक त्वं
मत्प्रीतये प्रीति-विवर्धनोऽसि ॥

Shri Shankara asks:
Oh my child, gladden me with your answer. Who are you, in whom delight wells up? Of whom are you? What is your name? Where do you come from? Where do you go?

हस्तामलकः

नाहं मनुष्यो न च देवयक्षो न ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः ।
न ब्रह्मचारी न गृही वनस्थः भिक्षुर्न चाहं निजबोधरूपः ॥

Hastamalaka replies:
I am not human, not a god nor a celestial being. I do not belong to any of the four castes: priestly, soldier, trader or labourer. Nor do I belong to any of the four stations, student, householder, forest dweller and monk. I am of the form of self-awareness.

निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधिराकाश-कल्पः।

रविर्लोकचेष्टा-निमित्तं यथा यः स नित्योपलब्धि-स्वरूपोऽहमात्मा॥

I am the Self which reveals itself incessantly. It is the Cause for the activities of the mind, eys, etc., but is devoid of all limiting adjuncts (upadhis) and is hence pure like space. It is the foundation of activities of life as the Sun is the foundation of all activities of the world.

यमग्न्युष्णवन्-नित्यबोधस्वरूपं मन्श्चक्षुरादीन्यबोधात्मकानि।

प्रवर्तन्त आश्रित्य निष्कम्पमेकं स नित्योपलब्धि स्वरूपोऽहमात्मा॥

I am the Self, of the nature of ever-present Awareness. Mind, eys etc. depend on the Self which is Constant Knowledge; and like fire is always hot. Mind and sense organs, inert by themselves, draw from the Self and do their work. The Self always remains one and the same, without a trace of movement.

मुखाभासको दर्पने दृश्यमानः मुखत्वात् पृथक्त्वेन नैवास्ति वस्तु ।

चिदाभासको धीषु जीवोऽपि तद्वत् स नित्योपलब्धि स्वरूपोऽहमात्मा॥

The reflection of a face produced by a mirror has no existence separate from the real face. There is no real existence of the embodied individual soul which is no more than a reflection of the "Chit" (Conciousness) produced by the intellect. I am that Self-revealing substance, the SELF, which is the One Source from which all reflections emanate.

यथा दर्पणाभाव आभासहानौ मुखं विद्यते कल्पनाहीनमेकम् ।

तथा धीवियोगे निराभासको यः स नित्योपलब्धि स्वरूपोऽहमात्मा ॥

When the mirror is removed the real face alone remains; no reflections, no fancies! In the same way, when the intellect subsides the Self alone shines forth with, with no reflected (individual) Consciousness. I am that "Ever Shining Self"

मनश्चक्षुरादेर्वियुक्तः स्वयं यः मनश्चक्षुरादेर्मनश्चक्षुरादिः ।

मनश्चक्षुरादेरगम्यस्वरूपः स नित्योपलब्धि स्वरूपोऽहमात्मा ॥

